दिनाधर्मविशेषणत्वमभ्युपसृत्यपरिहरतिसंभवाच्च॥ नहिधूमालोकान्यान्यत्वंवह्निव्याप्तिव्याप्यत्वंवह्नुदकमन्यान्यत्वंतम
पहायथमितरमस्तियेनतयाधर्मविशेषणंस्यात्॥ धूमालोकादेरवह्निव्याप्यतावह्नुदकंधूमत्वादिकमेवास्तीतितत्रैवधर्मविशे
षणंयुक्तंव्याप्यत्वाभिमतत्वेनावह्नुदकेभवतिग्रहसंभवतिगुरूपात्तदग्रहात्॥ निरुक्तेचधूमत्वादेरेवावह्नुद
कत्वात्तदन्यान्यत्वंनावह्नुदकेगौरवादितिभावः॥ प्रसक्तेरितिं॥ यथायुक्तेरीत्याधर्मविशेषणत्वाभावेनधूमालोक
न्यान्यत्वेनवह्निव्याप्यतानुमानंसंभवत्येव॥ तथापिप्रसक्तिसामग्र्याःबलवत्त्वात्तत्सत्वेनहानस्यापिविशेषदर्शनत्वेनो

पक्षेगइतिभावः॥अन्वयेति॥करचरणान्यतरच्छिन्नपाषाणांतरसंसृष्टायोगोलकपुरुषप्रसङ्गस्यसर्वसिद्धत्वात्॥मुरारिपू
मत्वाभावस्यान्यथासिद्धत्वेनव्यभिचारसहकारित्वादित्यर्थः॥ननुतदन्यान्यथासिद्धत्वज्ञानमपिस्वरूपेणप्रसक्त
सहकारीतिनवाच्यं॥अतिप्रसंगात्॥किंतुवह्निव्याप्यत्वज्ञानस्यैवेनतत्तुनसंभवति॥धूमवत्त्वंदेशांशेव्याप्यतावच्छे
दकस्यनिश्चयात्॥निश्चितस्यतदन्यान्यथासिद्धेःगौरवेणतदनवच्छेदकत्वादितिचेन्न॥व्याप्यतावच्छेदकरूपेण
नुपस्थितेपिफलबलेनव्याप्तिग्रहस्वीकारात्॥सहचारदर्शनादिव्याप्तिधीसामग्रीसत्त्वेतद्धीतिकरणाव्याप्यत्वनिग्रह
व्यतिरेकदर्शनस्य॥उक्तयावच्छेदकनधूमालोकान्यत्वेनापस्थितमेवपक्षधर्म्यव्याप्तिग्रहसचेति
धीरितिभावः॥यद्येवंसत्यपिवह्निव्याप्तिग्राह्यत्वपरामर्शीस्यात्सर्वकिलक्षणेदनुमानमपिसंभवतितथापि प्रसक्त
सामग्रीसत्त्वेनिश्चयकरणमितिसमंतत्॥ननुव्याप्तावच्छेदकेनतदनवच्छेदकेनवाव्याप्यत्वनियमेतसमाधि
कल्पातपाप्रतीतेयमानेनरूपेणपक्षधर्मतानमनुमितिहेतुरस्तुतज्ज्ञाताव्याप्यत्ववत्सनुमायेमाहकिंचेति॥अथव
हीति॥तथाचयेधूमव्याप्यवन्तस्तावत्यंवह्निमानितिवह्निव्याप्यतावच्छिन्नसकलधूमादिवृत्तिमहाव्याप्तिज्ञानव
तयवत्तयाऽनुमितिरितुक्तानुमितिसकलसंग्रहेतज्ज्ञाप्यत्वेतिभावः॥ननुयोयोधूमवान्सवह्निमानितिवत्र योव

जनक इत्यस्मिन्नेरियनुद्याहरन्नेवेति ॥ गोरश्वादिरूपलक्षणं ॥ प्रामाण्यसंशयजन्यार्थसंशयेऽप्यविचारश्चेत्यविरुद्धं ॥ सामान्यलक्षणया पर्वतीयवह्निप्रकारमाह ॥ विशिष्यतीति ॥ अलौकिकं प्रसक्षं निरस्यति लौकिकं तु वाक्यमिति रस्यति नवेति ॥ विशेषदर्शनमिति ॥ यत्तु सेश्वरसांख्ययुक्तरप्रसक्षमपि प्रेस ॥ अन्यत्तु ॥ यद्वच्छुदनाधनेयज्ञानेतद्दर्शनं तदित्यादुः ॥ यत्तिविशिष्ठेति ॥ यत्पदेपि समज्ञानलक्षणप्रसासत्तेः सत्वादित्यर्थः ॥ वेदूरसन्निकर्षादिति ॥ संयोगलक्षणसन्निकर्षाभावादित्यर्थः ॥ ननुयथाप्तोज्ञानमवप्रसासत्तिस्तथावन्ह्यादिपुरुषज्ञानेपि सामान्यलक्षणयाधिकरणसंयोगादिरूपतया संयुक्तसंयुक्तसमवायेवप्रतिसासत्तिरिति चेन्न ॥ नचसंयोगादिरवश्यं सिद्धिस्तु साध्यादिज्ञानापदार्थविशिष्ठा ॥ नचविशिष्टसंयुक्तसमवायः ॥ नचसाध्यादिकंविशेषणविशेषणं ॥ नचतत्संनिकर्षोपयक्षणीयः ॥ मानाभावादितिचेन्न ॥ विशेषणासंनिकर्षेपिहन्तुमेमानाभावात् ॥ विशेष्यसंनिकर्षेत्वपक्षयापक्षेविषयविषयिसंनिकर्षेलघवादितिचेन्न ॥ यदितदाविशेषणाविशेषणासंनिकर्षेपितुल्यं ॥ अ

नत्रमानत्वात्॥लौकिकप्रत्यक्षसामग्रीसत्वेऽत्यन्तानुमितिसामग्र्यास्तुल्यत्वस्यापिवक्तुमशक्यत्वात्॥नचात्रप्र
त्यक्षमेवास्तुघनत्वेतिवाच्ये॥वह्निमनुमिनोमीत्यनुभवस्यापाधितत्वात्॥यत्तुविशेष्यस्यविषयविशेषतयातत्संन्नि
कर्षस्यापेक्षयालाघवात्॥विषयसंनिकर्षत्वनहेतुत्वेनविशेषणसंन्निकर्षोहेतुरितितन्न॥यत्रेदंरूपवत्वेन्द्रि
यप्रत्यक्षंस्यादेव॥पर्वतस्त्वग्विषयसंन्निकर्षेसत्यात्॥कारणतावच्छेदकावच्छिन्नयत्तिविरहस्त्वपेक्षाप्रयुक्तः॥वि
शेषणसंन्निकर्षेविशेष्यासंन्निकर्षेतद्दृष्टिरूपप्रत्यक्षापत्तेश्च॥नचयत्रद्वयसंन्निकर्षत्वेनहेतुत्वमितिवाच्यं
यतदपेक्षयाविशेष्यसंन्निकर्षस्यैवलघुत्वात्॥संसर्गेसत्येवभानाभ्युपगमनत्वेमस्थलेतत्संन्नि
कर्षसंभवेनव्यभिचारात्॥किंचविशेषणविशेष्यसंन्निकर्षयोर्मैकमवच्छेदकेविशेषणसंन्निकर्षस्यालौकि
कसाधारणस्यैवहेतुत्वं॥त्वन्माघनुरोधात्॥विशेष्यसंन्निकर्षस्यलौकिकस्यैवचक्षुरादिसहकारित्वं॥अन्यथा
स्मृत्यपनीतव्यवहितपुरुषदंडस्मृतिमतोदंडीतिचाक्षुषबुध्यापत्तिरन्यत्रभसंसर्गीग्रहदशायामपिदेवा
दत्तस्मृतिमतःसन्निकृष्टेपिव्यवहितदंडपुंसिदंडीतिबुद्धिर्नस्यादतइतिसर्वानुभवसिद्धं॥तथाचान्वयव्य
तिरेकाभ्यामेवतस्यहेतुत्वमित्यर्थः॥पक्षधर्मइतिपर्वतेवृत्तिर्धूमोवह्न्यव्याप्यइत्याकारंज्ञानमित्यर्थः॥विशि

अंश ०

॥ ५८

इति। वह्न्याप्यधूमवानयमिति यावत्। तदयमर्थः॥ अतएवेति। योयो धूमवानिति सामानाधिकरण्येन धूमवति वह्नेरसंबन्धाभावोऽव्यभिचारः
प्रतीयते। तेन तादृशस्यैव संबन्धाभावस्य प्रतियोगिनि संबन्धस्य प्रतिपाद्यते॥ वह्निमानेव धूमवानिति सामानाधिकरण्येन वह्निभाववान्न धूमवानिति
तिवह्नेर्विविरहवद्धूमनिष्ठं प्रतिपाद्यते॥ तदेवं व्याप्तेरनुमितिहेतुत्वेऽनन्यथासिद्धत्वेऽवच्छेदकतया
देमेवोदाहरणमित्यादिसंदर्भः॥ अत्रेदमनभिमतिबीजमाहुः॥ जनकज्ञानस्यावच्छिद्यमानजनकतावच्छेदकतावच्छेदकधर्मेण
प्राधान्येन भासते। तदवच्छेदकज्ञानेऽपि तावच्छेदकधर्मेण प्राधान्येनस्फुरतीति नियमः॥ दूषकस्य दंडवदिति। ज्ञानस्य च दंडीपुरुष
इतिज्ञानेदंडमात्रविषयतयैवजनकत्वमतोऽन्यथासिद्धयोरिति। तन्न॥ हृल्लघुतानास्तीतिज्ञानजन्यघटाभाववत
भ्रतल्लमितिज्ञानेऽन्यथासिद्धारतल्लविषयतयाविज्ञनकत्वात्॥ न चाभाववद्विशेषकप्रसक्ष्यमेवाधिकरणज्ञानस्यका
रणमिति। वाच्ये॥ लाघवेनाभावप्रसक्षत्वावच्छिन्नस्यैवाधिकरणज्ञानस्यहेतुत्वात्॥ यदपिकेश्चित्तद्धेजमुक्तं। साध्या
भावव्यधिकरणोदाहरणवाक्येनसाधनव्यापकतावच्छेदकरूपंदर्श्यतइतिनमुक्तं॥ केवलान्वयिनिसाध्याभावाप्रसिद्धेरि
तितदपिन॥ एवमपिलाघवेनव्यापकताज्ञानकारणत्वेदोषानभिधानात्॥ मैवंसामानाधिकरण्यगर्भतयाव्या
प्तिर्विव्यापकत्वेतुतदप्रवेशाल्लघुतिमदिदमहेतुरयंतदासाध्याप्रतियोगिकसमानाधिकरणसंबन्धाभाववत्त्वमेव
व्याप्यत्वमस्तु॥ व्याप्यत्वंघटकानामेवेपदार्थानामत्रापिप्रवेशेनतदपेक्षयागौरवाभावादिति। तत्रास्वरसवीक्षते।

तन्नायेतावतामग्निज्ञानकारणतायांविनिगमकाप्रसक्तिंचसूक्ष्मयाप्यपेक्षणाव्याप्यवत्त्वमेवलघुतादृशायावद्देशेत्त-
भावस्वरूपभेदेनगुरुत्वात्॥अन्यथाव्यभिचारिसाधारण्यात्॥स्वसमानाधिकरणासत्ताभावप्रतियोगित्व
सामान्याभावरूपव्याप्यत्वेयावत्प्रवेशेनलाघवादिति॥अन्येतु॥अन्येतुपर्वतवृत्तिधूमव्याप्यत्वेवह्नौसंदेह
ध्वस्तमुपनेयंतथाचवह्नावित्यन्यत्रोपनीतबुद्धिग्राह्यंतदातस्याप्यनुमितिसाग्नीतिसमूहालंबनैवानुमितिः
स्यात्॥नचैकानुमितिरूपनेयप्रतीतावुपनयासिद्धिरेकमत्वरसबीजं॥अपरंचवस्तुतोलाघवमेवनेत्थं
हि तत्समानाधिकरणासत्ताभावप्रतियोग्यसमानाधिकरणत्वविशेषणाभावस्यकल्प्यानिष्प्रमाणतदर्थं अत्र
प्रतियोगिसमानाधिकरणाभिन्नत्वेप्रतियोगिसमानाधिकरण्याभावत्वंवाऽभ्युपेयंतथाप्रतियोग्यधिकरणान
धिकरणत्वगर्भेतथाचकालादेरतिव्याप्तिरापत्तिः॥मयत्वसमानाधिकरणाःप्रतियोग्यधिकरणाभिन्नाधिकर
णाभावःघटाभावादयः॥तदप्रतियोगित्वंकालिकाद्यसत्त्वेनानुमेयसमानाधिकरणाकालिकसत्ताभावस्यप्रतियोग्य
धिकरणाधिकरणाभिन्नतमतत्प्रतियोगितयाकालस्यकथंतदप्रतियोगित्वंव्याप्यवत्त्वमितिचेन्न॥प्रतियोग्य धिक
रणाप्रसिद्धाकालाभावस्यप्रतियोग्यधिकरणाधिकरणाभिन्नत्वाभावेनविशिष्टतादृशाभावाभावाप्रति यो

मितपाकाद्यास्यव्यापकत्वतत्वस्यात्॥ तस्यतद्रूपणापसाधनसमानाधिकरणात्वविशेषणमावश्यकमित्यन्यूना॥ नमिरित्त
परार्थ्यगमेतयोभयोःसमानतयाकथंव्यापकत्वेलाघवमितिभास्वरसबीजमित्याहुः॥ तत्रनाद्यः॥ विशेष्यविशेषणं न
त्रचविशेषणेतरमितिन्यायेनधूमपर्वतवृत्तित्वंधूमव्यापकत्वंचचन्द्रोभासतद्रूपवपर्वतवृत्तिधूमव्यापकत्वभानेपप
तौभान्यत्रापितद्रूपापक्षाधूमव्यापकत्वेचबन्द्रावपूर्वाग्रहीतमितिस्मृतमुपनयमितिनकाप्यनुपपत्तिः॥ नद्वितीयः
प्रतियोग्यधिकरणाधिकरणोःसंयोगाभावादयःतद्भिन्नत्वस्याकाशतावत्सत्वात्प्रतियोगित्वस्यापिभिन्नत्वे प्रति
योगिविशेषणात्वात्॥ एवंसत्यपादानगोचरजन्यरूपजन्यतादावप्रसिद्धिरप्यस्मदादिप्रत्यक्षत्वंवक्ष्यते॥ तथाचयथाश्रुतन्याय
शब्दव्यापकत्वप्रसंगोनिरासान्नसाधनसमानाधिकरणात्वमत्रविशेषणं॥ यत्तुव्यापकत्वेलाघवेनस्यादिति॥ किंचअन्या
न्याभावगर्भव्याप्तिरवानूमितिहेत्वनुगमेभङ्गदोषमितत्वात्॥ तद्भेदव्याघकत्वप्रतियोग्यसमानाधिकरणप्रवेशा
त्तदपिचैवमपिसाधिकरणात्वमात्रमेवोक्तदोषनिरासायोक्तंतथापिव्यापकत्वेलाघवमेवतस्मादिदमौत्सर्गिकबीजं॥ यत्तुदिनाव्यापकत्वनिश्चितसाधनसाध्यसामानाधिकरण्यस्यसंशयेव्याप्तिग्रहनिश्चयेवानुमितसमुत्पादात्तं
न्निश्चयःस्वधर्मिव्यतिरिक्तज्ञानेपदुत्पत्तिप्रतिबंधकंतन्निश्चयस्यतथेत्वात्॥ नचव्यापकत्वस्यसाध्यसामानाधि

रण्यनियतयोतपातत्वानेतत्संशयाद्यनक्कऽरतिवाक्यं॥नद्विस्तत्तस्यहाय्यमानेतदिरोधिकिंतुव्याप्यत्वेनतद्धर्मं
तथाचतदतिसंधानस्यांतस्संशयादिदंरव्यादेवयदिचयेतद्दोषायसाध्यसामानाधिकरण्यनियमेनैवव्या
पकत्वज्ञानमनुमितिहेतुरितिमन्यसेतदाविपरीतमेवगौरवमिति॥ ॥परामर्शवादःसमाप्तः॥ ॐ दंडत्व
दोऽप्यनिचारादाहत्वाधकंविनेति॥तत्रान्यथासिद्धिरेवबाधिकेत्यर्थः॥अन्यथासिद्धमिति॥तथाचाग्न्यभिचा
रीतिभावः॥धूमवान्वह्निमानितिवर्तमानधूमविशिष्टवर्तमानवह्निविशिष्टानुमितिरितियावत्॥तेननोक्तोबाध
दिरितिध्येयं॥ज्ञायमानेति॥ज्ञायमानविशेष्यतावच्छेदकजन्येत्यर्थः॥तेनज्ञायमानवह्निजन्यतयानार्थांतरमिति
भावः॥विशेषणेति॥वर्तमानविशेष्यतावच्छेदकविशिष्टवर्तमानविशेषणांतरवद्विशिष्टावगाह्यविशिष्टज्ञानत्व
दित्यर्थः॥विशिष्टज्ञानपदंचजन्यानुभवयोरतेनभ्रमज्ञानस्मरणेचनव्याप्तिः॥निर्विकल्पकत्वमेवप्रतीकेनैववा
रणात्॥उपमितेश्चव्यदिसपक्षत्वेनाभ्युपेयते॥तदातदन्यत्वमपिविशेषणंदेयं॥विशेष्यभानेतिविशेषणांतरमा
नेत्यर्थः॥अन्यथेति॥तथाचज्ञायमानविशेषणजन्यत्वमेवानन्यगत्यातत्रनियामकं॥कल्प्यमित्यर्थः॥नन्वेव
मुभयाऽनन्वयिलिंगस्यकरणत्वंकिंविनिगमकमित्यतआह॥किंचेति॥ अतीतेति॥नन्वेवमपिविद्यमानलिंग

कानुमितिस्यात्छुदेनलिंगस्यहेतुत्वमस्तितिचेन्न॥अतीतादिस्थलेपिलिङ्गसामग्यैवानुमितेरुपपत्तौविशेषसामग्र्यं
तरकल्पनागौरवात्॥अन्याग्यलिंगकानुमितौव्यभिचाराच्च॥तत्रपरामर्शस्यतद्व्यापारस्यासंभवेनलिंगस्याकारणत्वा
त्॥द्वारादिनापरामर्शोद्यत्रानुमिस्तत्रविद्यमानस्ययोग्यस्यापिलिंगस्याकारणत्वाच्च॥परामर्शस्यतद्व्यापारस्याभाव
त्॥यदिनित्यीपारम्पर्येवतस्यतत्रकारणत्वंतदातादृशस्यपरामर्शस्यैवतथात्वमस्तु॥औत्पत्तिकस्यादितितिभावः॥परामर्शो
तिपरामर्शद्वारैवत्वयापिलिंगकारणत्वेनयुपगमादितिभावः॥भाविनीति॥यद्यपिभाविन्यपेक्ष्यतेतदलिंगस्यवि
द्यमानत्वंसंभवत्येव॥तथापिन।स्वरूपेणतस्यकारणत्वेकिंतुपक्षधर्मतयातथात्वेचतस्यतदानींपक्षत्वान्नसंभ
वतीत्यपिप्रायेणयेनदुक्तं॥ननुभूतत्वमेवसंभवितत्समर्पितस्यज्ञानविशेषस्यादलिंगांतरस्यापिसंभवात्॥
नचायमेतदतिरिक्तयावदेनप्रमेयनिरूपयतिविशेषस्यवतत्रलिंगत्वं॥धर्मोत्तरस्यसाध्योक्तभूत
त्वेनालिंगत्वादितिवाच्यं॥प्रकारभेदेनाभयरूपत्वाविरोधात्॥अतयेवणियासोपद्यामनसमर्थनावछुदेकरूपानु
मानं।तायत्वनसनुशायेनाह।यदिचेति॥वर्तमानतमासंदिग्धादितिभवतीमानादवतिशेषः॥तथाचधूमस्यग्निश्रि
तत्वेपिनसोऽसादश्रित्वेपिनग्निश्रितत्वमितिकस्यापिन्हेतुत्वमितिशेषः॥यत्तुभूतभविष्यदवर्तमानतयानिश्चितस्य

धूमस्यवर्तमानदिनेऽतीतदिनवृत्तित्वप्रविशेषणमात्रेध्वंसेनैवेनविशिष्टध्वंसस्यनिष्प्रत्येतुंशक्यतयातस्यैवहेतु
त्वंस्यादितिचेन्न।विशिष्टध्वंसस्यघटादिक्षणिकत्वापक्षेतथाहितेनैवनिराकरिष्यमाणत्वात्॥नचतथैवघटादे
विशेष्यस्यविद्यमानतयाविशेषणमात्रध्वंसएव।सविशेषणीहीतिन्यायेन॥अत्रधूमस्यविशेष्यस्यासत्त्वात्॥विशिष्ट
ध्वंसःस्यादितिवाच्यं॥येवमपिविशेष्यध्वंससंदेहेविशिष्टध्वंसस्यसंदिग्धत्वादवहेतुत्वेनस्यात्॥नहिविशेष्यसत्वेपिवि
शेषणध्वंसप्रयुक्तोविशिष्टध्वंसइतिभावः॥ननुतत्कालेप्रागभावादेःसंदेहेपिनपर्वतेतत्संदेहः॥प्रतियोगिसत्वेनचत
त्तत्रनिश्चयादितितत्रतस्यवर्तमानतमानन्निश्चयोस्तीतिनव्यभिचारइत्यरुचेराह।किंचेति॥पर्वतेधूमनिश्चयो
दितिवक्तव्येतीतादिधूमविषयादितिदुष्टः॥ननुधूमप्रागभावादौनव्यर्थत्वंप्रागभावत्वेनिलङ्गात्वात्॥धूमविशेषणंवि
नाऽनुमानात्॥यन्निष्ठाभावप्रतियोगित्वंविशेषणंविनाऽनुमेयेनधूमेनतस्यैवार्थस्यकिंवसाधकंस्यात्॥येवंचाधिकसंख्याहकंविशेषणस्य
गुरुणापिनव्यर्थत्वंकिंतुसंख्याचविशेषणस्यैव॥यथानीलधूमादेर्यत्वेचधूमसंतानाद्वासंतानाभावत्वेपिनव्यर्थत्वमि
ति एवमिहापिस्वरसादाहार्यश्चकल्पितः॥अथमापस्थितधूमसंतानादनुमितेःसंतानादेर्विशेषसाधनेनानुमितिसंतानाद्वासंतानाभा
वादनेहेतुत्वमित्यर्थः॥नन्वेवमप्यनुमितिसमानप्रागभावादनुमितिजनकत्वंस्यादवसरुचेराह।किंचेति॥कालिकसंबन्ध

स्मृतेरप्रामाण्यमपि प्रकारांतरमाह अथवेति यथा चैतत्तथा व्याख्यास्यामः ॥ तथैवेति ॥ ननु व्यापारस्तस्यैव नकरणं त्वं
किंतु क्रियायोगव्यवच्छेदेनसंबंधिकरणमिति चेन्न ॥ करणस्यकारकविशेषत्वात् कारकत्वस्यव्यापारयोगित्वात् ॥ किंचद्र
वैदात्रिमायोगव्यवच्छेदश्चक्षुरादावपिवास्तीत्यचाक्षुषत्वमीदावप्यस्तीतितस्यापितत्वंस्यादतइति ॥ किंतुव्याप्तिज्ञानमिति
अत्रवदेति ॥ यत्रविशेषदर्शनंव्याप्तिस्मरणंशरीरप्रविष्टसहचारादिपदार्थानांस्मरणंतिविशेष्यविशेषणंतत्रच विश
षणांतरमितिन्यायेनविशिष्टवैशिष्ट्यावगाहिपरामर्शोत्पादनमितितत्रपरामर्शद्वाराव्याप्तिज्ञानस्यकरणत्वेन
संभवति ॥ तत्संवेतस्यास्वात् ॥ किंचमनस्तत्तत्परामर्शादनुमितितत्रापितदसंभवः ॥ नचतत्रस्वानुभवरूपम
व्याप्तिज्ञानंकरणमितिवाच्यं ॥ तस्यानुमित्यजनकीभूतसंस्कारोद्बोध्यत्वेनविलक्षणत्वात् ॥ व्यापारमात्रस्यैवकरणा व
धायकत्वोपगमात् ॥ अन्यथायागादेःस्वर्गादिहेतुतारक्षार्थं तज्ज्ञानकरणत्वंसंतद्व्याप्यत्वंसिध्येत् स्वर्गेजनकत्वकल्पन
नुपपत्तेः ॥ अतएवाहुः स्वागमव्यधाकमिति ॥ नचतत्रानुमितोसंस्कारोपिजनकः तस्याःस्मृतित्वापत्तेः ॥ अनुमि त्त
रव्याप्तिवाक्ये ॥ वस्तुतस्तुस्मृतिस्तत्परामर्शस्तज्जनकस्वानुभवस्यप्रत्यक्षरूपपरामर्शश्चव्याप्तिज्ञानस्यापक्षीया
स्यात् ॥ अन्यथासिध्यत्वमेव ॥ अन्यथास्मृतिजन्यप्रत्यभिज्ञानादौस्वानुभवस्यविशिष्टवैशिष्ट्यप्रत्यक्षादौचविशि ष्टज्ञान

जनकत्वेनाप्यनुमानस्यापि करणत्वापत्त्या कुलेस्यात्॥ अनुमितौ व्याप्तिज्ञानवत्॥ परामर्शजनकपक्षतावच्छेदकधर्मवि
दिरूपविशेषणज्ञानमपि करणं स्यात्॥ नचानुमितौ करणानुपपत्त्यासर्वत्रानुमितिरेव्याप्तिज्ञानेतत्करणं वक्तव्यं
मितिवाच्यं॥ परामर्शान्यासाधारणव्यापारवैशिष्ट्यमनसयेवसाधारणीभूतमनःकरणत्वसंभवात्॥ तदुक्तं प्रभा
ध्यां मनोलक्षणावसरे॥ स्मृत्यनुमित्यादिकरणत्वेनमनःसाधितमिति॥ तस्मान्नक्षमतेःतथाहि॥ अनुमितौम
नोनिष्ठोनसःकरणत्वेनस्याऽतिरिक्तज्ञानवन्मानसप्रसक्षतापत्तिः॥ करणान्तरासहकृतमनोजन्यत्वस्यैव
मानसत्वनियामकत्वात्॥ नचपरामर्शजनकंकरणांतरमव्यापारकंस्यात्॥ तस्मात्परामर्शजनकेज्ञानेनैव्याप्तिज्ञाना
दीनांसर्वेषांकरणत्वेननकाप्यनुपपत्तिः॥ मननव्यापारत्वेनवश्रवणादिप्रतियोगीनांव्याप्तिकरणत्वमिव॥ नच
विशेषणविशेषणज्ञानस्यविशिष्टबुद्धेरिष्टापत्तिरेवहेतुहेतुतयाव्याप्तिज्ञानादीनांव्यर्थत्वंधीरि
तिवाच्यं॥ यतस्तस्यान्यथासिद्धिरतदन्यत्वेहेतुत्वेविरोधात्॥ कुलालत्वंतत्त्वेनान्यथासिद्धस्यापिकुलालपितृकुल्म
लत्वेनघटजनकत्वात्॥ तथाहेतुहेतुत्वेनान्यथासिद्धत्वेपिदण्डजनकत्वमविरुद्धं॥ नचतद्धेतुतादण्डकार्य्यत्व
तिरस्कारेणविहेतिवाच्यं॥ तदंशेपिक्रियायाःकरणजन्यत्वानुमानस्यैवपरिशेषविशेषयत्वेसितस्यविघ्नानतात्

घकान्नानुपरामर्शजनकत्वेननियमानन्यथासिद्धिप्रयोजकत्वेनतस्यगुरुत्वात्॥तथाचकाश्यादीनामपितत्रेतुतापत्तिः
भवस्थेदकुम्भाघटध्वंसात्कपालगौरवस्यादोषत्वात्॥दोषत्वंचापरामर्शप्रागभावत्वेनैवहेतुत्वमस्तु॥परामर्शध्वंसवृत्तित्वापे
क्षयाप्यस्यलघुत्वात्॥तन्नवृत्तित्वेहेतुतत्प्रागभावावच्छिन्नसमयवृत्तित्वंतथाचतत्प्रागभावत्वमेवलघ्वितिचेत्ति
परामर्शेनैवान्यथासिद्धस्योक्तत्वात्॥तत्प्रागभावस्यानानुमितिहेतुत्वमितियद्दितदप्यतुल्यं॥कस्यांचित्तरानुप
पत्तावनुभवजन्यापितुल्यं॥परामर्शजनकत्वेनहेतुत्वपक्षेसंस्कारवत्परामर्शजनकसंस्कारवत्तरामर्शप्रा
गभावस्यापिहेतुत्वाभ्युपगमाच्च॥तथाचकरणानुमानानुपपत्तापितत्प्रागभावत्वेनैवहेतुत्वंकल्प्यतांनतुतज्ज
नकत्वेनातिगौरवात्॥यत्वंचसंस्कारमात्रवहितस्यपूर्वानुभवस्यतज्जन्यसंस्कारस्यवाहेतुत्वव्यवस्थापनमाहेत्ति
भेदेतिस्यरमपनुकूलंभवति॥वस्तुतःतत्त्वज्ञानमात्रस्यापिनानुमितिकरणत्वंपरामर्शेनान्यथासिद्धत्वापाद्य
त्वयवमानाभावात्॥करणान्यथानुपपत्तिमन्निमितिचेत्मनसयेवकरणत्वसंभवात्॥तथापिकिंविनिगम
कमितिचेन्न॥मनसानुमितिहेतुत्वस्यक्लिप्तत्वात्॥परामर्शप्रागभावस्यचतत्कल्पनेक्लिप्तत्वात्॥प्रागभाव
स्यापेक्षयामनस्त्वस्यजातितोलघुत्वाच्च॥नन्वेवमनुमितेर्मानसत्वापत्तिः॥करणंतरासहकृतमनोज

मेनप्रकारत्वेनपरामर्शस्यहेतुत्वमितिन्यायेः॥एकारत्वेनपरामर्शस्यैवैतदुपस्थितेरावश्यकत्वात्॥नन्यपिचारः स्मर
णलक्षणपरामर्शस्थलेतदनुभवस्यैवकरणत्वमितिन्यायेनयथाश्रुतएवग्रंथःसाधुरितितन्न॥एवंसतिविचारोऽप्रयोज
न्यथास्यादनुभवात्॥किंत्वाप्यभिचारज्ञानसहकारस्मरणानंतरंविशेष्येविशेषणांतरमितिन्यायेनव्या
प्तिविशिष्टविषयपक्षधर्मतास्मरणादप्यनुमितेरप्यनुभूयमानत्वात्॥नन्यायेनप्रकारत्वेनतस्यहेतुत्वमितिविषयपरि
शोधकस्यैवेति॥नचैतस्यानुमितेःकथमुपयोगः॥नचैवंसतिधूमोऽयंवह्निमत्तयेतिवाक्ये॥परामर्शस्यैव विशे
षदर्शनत्वेनतन्निवर्तकत्वादितिचेत्॥अत्रोच्यते॥विशेषदर्शनस्यरसवाहिनीशंकानोदेति॥अन्यथाहितानुत्थेयं॥कथं
मन्यथाप्रामाण्यशंकादिनाअर्थनिश्चयेसत्यर्थशंकोदयःतस्मादेहपरामर्शनिस्वरसवाहिनीसाध्यशैथिल्यंवा॥नानि
वर्तनंवयंप्रमाणयंवतस्मात्संबंधनातत्साध्याभावशंकाकथंनोदेत्॥तदुक्तंकिरणावल्यामाचा॥पंच
रयोःविरुद्धिप्रमाणसदसद्भावशंकामुहूर्तमनुमितेविघ्नेवेतनुमानारंभइति॥तथाचयथाचधूमादग्निंमता
नेनुमानेनप्रवर्तितंतदाकुतश्चित्तद्बाधाभावेसाधकादग्निंभूयोनवनुत्तरंतिशंकायांतत्किंवह्निविरहसाधक
मितिजिज्ञासासाचसत्यपिपरामर्शेजायमानायदिनवैन्हिःस्यान्निधूमःस्यात्तथाचवन्हिविरहसाधकेन

किमप्यत्रतत्सत्वेवह्निसाधकधूमानुपपत्तिरितितर्केणापनीयतइतिविषयेपक्षिप्रभेप्रतिबंधकशंकाविरहाद्
नुमितिरविकलेभवतियत्रचस्वतःसिद्धशंकाविरहःतत्रकस्यापिनोपयोगइतिध्येयं॥ ॥इतिलिंगकरण
तावादःसमाप्तः॥ॐ॥ तच्चानुमानमिति॥अनुमानविषयीभूतंलिंगमित्यर्थः॥केवलान्वयीति॥व्यभि
चारोपाकेवलान्वयिधर्मसाध्यकमित्यर्थः॥असतिपक्षेमित्यत्रकेवलान्वयिसाध्यकमितिशेषः॥यथाश्रुत
सिद्धसिद्धिव्याघातात्॥अभिधयत्वस्यशब्दशक्तिविषयत्वस्यनविपक्षः॥ओकारशब्दादेरप्यास्याद्यादिपदा दन्य
स्यवस्तुपदादिशक्यत्वादितिभावः॥अभिधानइति॥यत्रैवपदेनाभिधानंतत्तदशक्तिविषयत्वादेवन विपक्ष
त्वमनभिधानेनवस्तुपदादेरपिअनभिधेयतयाऽवस्तुत्वादेवनविपक्षत्वमित्यर्थः॥एतदाशयेनैवपदजन्य
ज्ञानविषयत्वंविपक्षत्वंवस्तुत्वेवस्तुत्वंचैवस्यादितिद्वितीयविकल्पव्याख्यानंकृतं॥अभातियेवंचेति॥तत्र
मेणव्याघाताभावेसिद्धसतीत्यर्थः॥अन्यथाव्याघातादेवानुमानेनाधितस्यार्थस्यापितिभावः॥यथमेसाध्यवति
गंकेवलान्वयितथर्मिनिरूपयति तत्रनतावदिति॥यस्तुतत्रक्रमणासंतताभावाप्रतियोगित्वमेवकेवलान्वयि
धर्मत्वेपाहनेतत्वेभिमतं॥अथचाव्याप्तिरिहाशंकतेतत्रेति॥यदीदंलक्षणं तत्रदंतदानायमस्यतावः॥

केवलान्वयीत्यादिरसंभवीत्यर्थः। यदि तु लक्ष्याकांक्षायामव्याप्तावतारोऽलक्षणाक्षेपेण तत्रप्रथायनस्यविरुद्धत्वापत्तादिति
तन्न॥ यत्नाधाश्रयत्वादिसंभवस्यासंगतत्वापत्तादिति। नन्वयमपि दृश्यसंसर्गाभावरूपाश्रयनाशजन्यमुपा दिना
शासंसर्गाभावोऽपि केवलान्वयिनेत्यग्राह्यः॥ येनतत्राव्याप्तिराशंक्यतेन चोक्तलक्षणेऽव्याप्तिरेवदुर्ल्लभा नाति
व्याप्तिरित्यभिप्रायेणतदुभावतारइतिवाच्यं॥ लक्षणांदूषयितुमुक्तत्वादित्यग्निमाञ्जक्यतेन्निरासप्रयास स्यासं
भवदुक्तिकत्वात्॥ अथापिस्वदतिव्याप्तिसत्त्वेपितदिष्टसिद्धेरेवसिद्धेः॥ उक्तेनैवापवत्तेश्च॥ नचैवमप्येलक्षणप्रणं
यनविरुध्यंस्यादितिवाच्यं॥ वृत्तिमदिसादिघटितकेवलान्वयिलक्षणनस्यतत्राभावप्रतियोगित्वमात्रेत्र भाचा
व्याप्यदृश्यसंसर्गाभवेऽपाकाशासंसर्गाभावोपिवाकेवलान्वयिष्येवेतिनोक्तदोषइत्याशयेनतत्वणमन्ना त्र॥
यथावस्तिभूतलक्षणानाव्याप्यदृश्यसंसर्गाभावसंग्रहस्तथाग्रेवक्ष्यते॥ प्रतियोग्यसंवेति। नचप्रतियोगि प्राग
भावादिनिर्वक्तव्यतिकथमवधारणं॥ तस्यापिप्रतियोगित्वात्॥ घटासंसर्गाभावस्यैवतत्त्वागभावाद्यसंसर्गाभा
वस्यादितभावः॥ प्रतियोगीति। प्रतियोगितावच्छेदकसम्बन्धेत्यर्थः॥ वृत्तिमदिति। वृत्तिमान्योसंसर्गाभाव स्तद
प्रतियोगित्वमित्यर्थः॥ नन्विदानीमाकाशादितिप्रसंगादाकाशस्यापिवृत्तिमत्त्वात्॥ तदसंसर्गाभावेतथाव्याप्तिः

नचवृत्तिःसंयोगःसमवायोवाविवक्षितवृत्तिवाच्यं॥घटादेरेवैकत्वान्यथानुपपत्तेः॥अन्यथाप्यवृत्तेस्तेनाभावाव्याप्त
श्चेतिचेन्न॥तत्रवृत्तिविरोधिवृत्तेःवृत्तिपदेनविवक्षितत्वात्॥स्ववृत्तिविरोधित्वंचस्वसामानाधिकरण्यधीविरोधि
त्वंसंयोगादिवृत्तिश्चनतदसंत्ताभावविरोधिनीतिनतत्राव्याप्तिः॥नन्वेवंसंयोगस्यापिकेवलान्वयित्वापत्तेश्च॥तदसंत्ता
भाववृत्तेरपितद्वृत्तिविरोधित्वाभावात्॥वृक्षादावुभयोःसमानाधिकरणयोरितिचेन्न॥कर्मादावधिकरणेतदसं
त्ताभाववृत्तेरपितद्वृत्तिविरोधित्वात्॥यद्यपिसंयोगवृत्तिरपिस्वावच्छेदनस्वसंत्ताभावविरोधिनीभवत्येवतथाचते
त्राव्याप्तिरेव॥तथापिस्वसामानाधिकरण्यधीविरोधित्वन्नास्तिसंयोगावच्छेदनतदसंत्ताभावासत्वेतत्सामानाधि
करण्यबुद्धेरप्रत्यूहत्वात्॥नचैवंमेघादिवृत्तिविरोधिवृत्तेरप्रसिद्धेः॥नचाव्याप्तिरितिवाच्यं॥स्ववृत्तिस्वविरोधिवृत्तिम
दसंत्ताभावप्रतियोगिनोघटादयःप्रसिद्धातदन्यत्वस्यापित्रापिसत्वात्॥ननुतथाप्याकाशसंत्ताभावःकथंकेवलान्व
यीकालादेतस्यसत्वेनतस्यदसंत्ताभावासत्वात्॥नचसंयोगित्वेनतदसंत्ताभावस्तथात्वेतुलादौसंयोगित्वेनघ
टादिवृत्तेरसत्वेनतस्येत्ताभावासत्वात्॥नचाकाशसंयोगस्यैरतुलादिवृत्तित्वंयाकाशेतत्रनवर्तनेतरीतिवाच्यं॥यदि
घटादेरपिरतुलादिवृत्तित्वंनस्यात्॥नापिसमवेतत्वेनतदसंत्ताभावेत्तथा॥यदधिकरणाधर्मावच्छिन्नाभावाप्रयोग

प्राप्तेरिति चेन्न। इदानीमप्रतिपन्नदशाकाशसमवायाधारधेयभावप्रतीतेरसिद्धेर्नित्यसंयोगित्वेनानित्वेतथाचत
दवच्छिन्नाभावयेवतस्यकेवलान्वयीस्यात्॥ अन्येतुभूतलसंयोगोनावाकाशस्यभूतलादौसत्वेतथापिसमवाय
संबंधावच्छिन्नाकाशसंबंधाभावयेवयेवकेवलान्वयी॥ नचैवंव्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमापत्तिः॥
आकाशत्वावच्छिन्नप्रतियोगिनयेवतस्याराध्यसमवायसंबंधेनाभावाभ्युपगमात्॥ आराध्यसंबंधभेदेनैवा
भावभेदात्॥ नचाकाशसमवायप्रसिद्धातदाराधापिकथमितिवाच्यं॥ सर्वत्रवैदिष्ट्यस्याप्रसिद्धस्यैवाराध्यत्वात्॥
नहिघटानास्तीत्यत्रभूतलघटसंयोगोपिप्रसिद्धः॥ तथाचयथाराधाराधेयविषयप्रसिद्धातदुभयसंसर्गोप्रसिद्ध
येवाराध्यते॥ यथावान्योन्याभावेतदुभयप्रसिद्धिमात्रेणतदुभयतादात्म्ये॥ तथाजातीतिनकाप्यनुपपत्तिः॥ यदि
चसंबंधमेदेनाभावभेदोनाभ्युपगम्यते॥ तदाऽऽत्मादितरभ्योपिघटोनाभादितिकेवलव्यतिरेक्यनुमानेसर्व
सिद्धिःस्यात्॥ विषयविषयीभावसंबंधेनज्ञानस्यवस्तुमात्रवृत्तितयाज्ञानस्यावच्छिन्नाभावाप्रसिद्धेः॥ तस्मा
द्यथाघटादेर्विषयविषयीभावेनज्ञानसत्वेपिसमवायेनतदभावः॥ तथातत्रसंयोगादिनाकाशादिसत्वेपिसम
वायेनतदभावःस्यात्॥ येनसंबंधेनयदभावःतत्संबंधेनैवतत्सत्वेस्यतदसंबंधाभववृत्तिविरोधित्वात्॥ तस्मा

ष्टिकरणधर्मीनावच्छेदकीभूताभावभेदकः॥आरोप्यस्यसंबंधोहस्याभेदकमेवेतिविभागः॥येवंचयेनसं
बंधनयस्यनवृत्तिस्तत्संबंधावच्छिन्नतदभावःकेवलान्वयीतिपरमाण्वंसंताभावेपिकेवलान्वयित्वेनाभ्यु
पेयत॥मेयत्वादेरसंतोभावोपितत्वेनेष्यत॥नचैवंमेयत्वाद्यभावस्यापिकेवलान्वयित्वाभ्युपगमतदप्रसिद्धि
निबंधनअयमपिचाप्रयोजकलक्षणकेवलान्वयप्यग्नेः॥एवंसतिविरुध्यतइतिचेन्न॥आप्तिश्चशरीरप्रवि छेद
बंधावच्छिन्नसाध्याभाववद्वृत्तित्वमप्यभिचारिणेनसाधीयसीमतं॥अन्यथासमवायावच्छिन्नवह्न्य भाव वच्छे
त्तित्वात्धूमेपिवह्न्यभिचारित्वानुपपत्तेः॥तथाचसमवायसमवायावच्छिन्नाभावप्रतियोगित्वेपियत्न त्व
नचमेमयत्वमितिआप्तिशरीरप्रविष्टस्वरूपसंबंधावच्छिन्नसाध्याभावाप्रसिद्धानत्वाप्तिसंभवाद्दो॥य
वंवृत्तिमत्वंस्याप्रसिद्धिवारकतमानमप्यर्थसंशयकारि॥अप्राप्तिवारकंहिसाध्यात्॥वस्तुतस्तत्रापिनदोर्थ
त्वमुक्तमिंद्रियलक्षणाभोक्तानवसरेइत्यादयंतुभ्रमः॥अन्योन्याभावप्रतियोगितानवच्छेदकधर्मत्वं
केवलान्वयित्वं॥अन्योन्याभावोप्यवृत्तिरेवेतिनाप्तार्थ दृस्संतावोभावेअप्राप्तिरितिमेयत्वंकेवलान्व
यिधर्मलक्षणंतेधूमेसाध्यसंबंधेकेवलान्वयिलिंगलक्षणंवाकथं॥तेनायंप्रमेयोघटत्वादिसादध्यपिनाप्राप्ति

सर्वसाधारणान्वयिनो ऽलक्ष्यत्वात्। दृश्यविशेषान्वयि धूमाद्यग्न्यनुमेयेषु इति भेदः॥ सदनुमानविभागोऽयमे
तिऽनयैव दिशा प्रमेयत्वादिष्वनुमानाभासस्यनिरुक्तत्रयवहिर्भावेविनक्षतिरिति बोध्यं॥ तथेति॥ आदिपदादि
गंतरोक्तसंसर्गाभावादिपरिग्रहः॥ ननुप्रमात्वंपरापरासंवेदनेप्रमेतिस्यात्॥ नमयमितिविशेषणस्यैवप्रकारत्वात्
नसंबंधस्यतच्चेराह॥ प्रमाजनीयेति। यद्यप्यस्मन्मतेऽप्यवयवव्यक्तिरूपदृष्टमवयवमनुगतमेव तथापु
भयमतसाधारण्यादेतदुक्तं॥ भिन्नेति। सचनप्रमाजनकः॥ अतिप्रसंगादितिभावः॥ अलिंगेति॥ च शब्दस्त्वे
वार्थः॥ तथैवसंशयकोटित्वादितिभावः॥ साध्यसिद्धीति॥ साध्यसिद्धिर्विरोधिनीयस्यसः साध्यसिद्धिर्पर्वतश्च
इतिभावः॥ समानविषयत्वमिति॥ समानविशेष्यकत्वमित्यर्थः॥ घनगर्जितादावप्यनुमितेः संशयस्यानुमिसं
गत्वमिसभिप्रायेणाहयदुत॥ पक्षेति॥ नचतदस्मदाद्यापेक्षसाक्षात्त्वमहदाद्यासुक्तयोग्यतासत्त्वेनानु
मितेरुपपत्तिः॥ पक्षनिष्ठायेतिभावःप्रतियोगित्वज्ञानविरोधिज्ञानाभावस्यैवयोग्यतात्वमित्याशयात्॥ अन्यथा
ज्ञात्वरसवीजे॥ यद्वमपिप्रमयत्वेसंशयाभावप्रतियोगित्वप्रसिद्धावपिप्रमेयानवेतिसंशयकोटिरस्तु खंडयमय
थाभावस्याप्रसिद्धिरवेति॥ एकवृत्तित्वादीसर्थः॥ अन्वयेति॥ तत्रैकव्यक्तिनिश्चयादप्यनुमि॥ केचित्तुयदिताद्

रणभ्रमः॥ततश्चैवनकेवलान्वयिलक्षणभ्रमोवेतिसादितश्रीजगदीशभट्टाचार्यैः केवलान्वयिलक्षणमिति विपक्षव्या
वृत्तत्वविकलमित्यर्थः॥ अन्वयव्यतिरेकिणीत्यनेनिश्चयेनगमकत्वदर्शनादित्यर्थः॥ रूपान्तरेति॥पक्षवृत्तित्वादीत्यर्थः
अन्वयेति॥तत्रैवाग्निनिश्चयाद्यनुमितिदर्शनादन्यत्रान्वयव्याप्तिनिश्चयेसतिव्यतिरेकव्याप्तिनिश्चयजन्यो ज्ञ
कस्यविपक्षव्यावृत्तत्वस्यानपेक्षतेतिभावः॥ननुअन्वयव्यतिरेकिणि॥अन्वयव्याप्तिप्रतीतौविपक्षव्यावृत्तत्वस्य
पिप्रयोजकत्वदर्शनात्तेनविनान्वयव्याप्तिनिश्चयायवात्तनस्यादित्यतआह। व्यतिरेकश्चेति॥अन्वयव्याप्तिप्रती
तावितिशेषः॥ व्यतिरेकव्याप्तावितिसप्तमीतथाचव्यतिरेकव्याप्तौसत्यांविपक्षसत्त्वेतद्वृत्तित्वज्ञानं
वृत्तिहेतुविपक्षव्यावृत्तत्वमन्वयव्याप्तिप्रतीतावुपयुज्यते॥ननुसाक्षात्तथाचात्मस्वतःसिद्धेतादृशज्ञानंकथंहे
तुनिवृत्तिप्रयोजकस्यव्यतिरेकस्यनकोप्युपयोगइतिभावः॥ महोपाध्यायश्रीदत्तविरचिततत्त्वचिंतामणि
प्रकाशेकेवलान्वयिवादःसमाप्तः॥ॐ तत्सत्परब्रह्मेति॥ सिध्यसिद्धिपरादृतमितितदर्थमाह यत्रेति॥व्यतिरे
केति॥व्यतिरेकसहचारमात्रयोरर्थः॥ दत्तविशेषभूमादःकेवलव्यतिरेकित्वमिष्टमेवतिभावः॥ यत्रेति॥प्रत्य
क्षाद्यन्यतमत्वेनचतुर्णांयत्रज्ञातीयप्रमाजनकत्वसंभवादित्यर्थः॥व्यतिरेकिसाध्यमिति॥अनुमितित्वप्रयोजकस

मोन्यैसामान्यसामग्र्यभावादितिभावः॥ अथेतिरुत्तिमतेनविशेषान्नाङ्गीव्याप्तिरित्यः॥ येवंसतिभेदकमाहयेव
मिति॥निरूपार्थंतिसाध्यसाधनव्यतिरेकसहचारेणसाध्यानुमितेरनुकूलान्वयव्याप्तिरेवगृह्यतइत्यर्थः॥ननुत्रापि
व्यतिरेकव्याप्त्युपन्यासेपिभेत्तरमितिचेन्ननियतव्यतिरेकसहचाररूपायास्तस्याःअन्वयव्याप्तिज्ञानार्थमेवोपन्या
सात्॥अन्वयव्याप्तिज्ञानंचपरस्यमानसमेव॥नह्यन्वयव्याप्त्युपन्यासेपिग्राह्यमवतत्॥ज्ञानमनुमितिर्जनकं॥वा
दिवचनस्यनिर्णयाजनकत्वात्॥तथाचयत्रान्वयसहचारसंभवस्तत्रान्वयव्याप्तिज्ञापनायनियतान्वयसहचाररूपा
सैवोपदिश्यते॥यत्रतदसंभवस्तत्रतदर्थंनियमतःव्यतिरेकसहचाररूपाव्यतिरेकव्याप्तिरेवनत्वेवंनियमः॥ज्ञापन्या
सायगीरुयावेम्यर्थमितिवाच्ये॥तस्यव्यभिचारभावमदर्शनेपर्यवसन्नतमापरस्यव्यभिचारज्ञाननिरू त्तावुप
योगात्॥ततस्तस्याअपिव्याप्तिग्रहोपयोगित्वात्॥नचैवमप्यप्तिकालत्वं अलिंगभावेनैवव्यतिरेकसहचारस्यान्व
यव्याप्तिग्रहहेतुत्वात्॥लिंगतमैवसाध्यकस्यसाध्यमनुपन्यस्योपन्यासेऽनाकांक्षितार्थोनप्राप्तकालत्वात्॥ नत्वे
अतएवोपाधिज्ञानादौचिसम्वर्जितेमानसमप्यभिचारज्ञानंसंभवतीतिसाध्यभिचारमनुपन्यस्योप धिरुपन्य
स्यतइतिसिद्धांतइतिभावइत्यादुः॥ननुव्यतिरेकसहचारेणयद्यन्वयव्याप्तिमात्रज्ञानंजन्यतइतिमतेतदा अन्वय

मात्रसहचारधीजन्यान्वयव्याप्तिज्ञानस्यवैलक्षण्यमावश्यकंतद्विलक्षणहेतुजन्यत्वात्॥विषयकृतेत्वेतत्रतं
न्नास्तीतिजातिरूपमेववाच्यं॥तन्नसंभवति॥चाक्षुषत्वादिनासंकरापत्तेः॥यदिचान्वयव्यतिरेकोभयव्याप्तिज्ञानेनज
न्यतइतिमतंतदान्वयव्यतिरेकोभयसहचारधीजन्योभयव्याप्तिज्ञानतस्तस्यतुल्यविषयतयाजातिरूपमेववैल
क्षण्यमुपेयं॥तदपिनयुज्यते॥चाक्षुषत्वादिनैवसंकरापत्तेः॥नचव्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनाभयस्य
हेतुत्वेनहेतुत्वेवैलक्षण्याभावान्नतत्रवैजात्यमितिवाच्यं॥सहचारस्यतज्ज्ञानस्यवाव्यभिचारज्ञानावि
रोधित्वात्॥तस्यतत्रापिवह्नौधूमादित्यभिचारायलेभादितिचेन्न॥स्वाधिकरणनिष्ठव्यभिचारज्ञानविरोधिसहचा
रज्ञानत्वेनाभयस्यहेतुत्वात्॥यत्रोधिकरणेसाध्यसाधनयोस्तदभावयोर्वासहचारमहत्तत्रहेतुसाध्याभावस्य
नाधिकरण्यात्मकव्यभिचारज्ञानस्यसर्वथैवासंभवात्॥ननुव्यतिरेकसहचारेणान्वयव्याप्तिज्ञानेव्याप्तिविशे
षणीभूतं लिंगविशेष्यकंजन्यते॥व्यभिचाराभावविशेषणकंसहचारविशेष्यकंवानाद्यः॥तत्रत्वेमन्वयव्याप्तिज्ञाना
भावात्॥लिंगेंद्रियसंनिकर्षाभावाच्च॥नेत्यः॥विशेषणज्ञानविशेष्यसंनिकर्षंविनातस्याभावात्॥व्यतिरेकस
हचारज्ञानमात्रकालेतयोरभावादितिचेन्न॥तंत्रपक्षस्यैवमुक्तत्वात्॥इतरसामग्र्यासत्त्वमेवतस्यव्याप्तिग्राहकत्व

भ्युपगमात्॥ विशेषणज्ञानादिसत्वेऽन्वयसहचारज्ञानेपितत्तोव्याप्तिग्रहस्येष्टत्वात्॥ नत्वत्तद्व्यतिरेकेणेति तस्यान्व
यसहचारस्थानाभिधित्सितत्वात्॥ अन्यथारत्नरेकारणविरहेसतोनव्याप्तिनिश्चयस्यसहचारस्याप्यनभ्युपगमेन
त्॥ अन्वयेति॥ उभयसहचारादन्वयव्याप्तिरेवगृह्यतइति मतावष्टंभेनेदमुक्तं॥ एवमन्वयव्याप्तिग्रहपक्षेतावच्छे
दकांतरप्रतीत्यनियमात्॥ प्रकारांतरमाह दधित्वमिति॥ येषांकेवलव्यतिरेकिणोऽभावरूपस्यासंभवप्रसिद्ध
मिमप्यसिध्यति॥ अन्वयव्याप्तिस्मरणजनकेविशेषणज्ञानादिविरहेपिव्यतिरेकव्याप्तिस्मरणादेवानुमितिसंभवादनु
पगमः॥ तेषांमतेनप्रकारांतरमाहयदुतेति॥ तच्चाग्रेवक्ष्यमाणेनव्यतिरेकसहचारस्यविशेषणसन्निकर्षादिसत्वेन्व
यव्याप्तिस्मरणहेतुत्वेतरसत्वेव्यतिरेकव्याप्तिस्मरणहेतुत्वमेव॥ तस्यनियममेवदर्शयितुंसहचारेणनायंग्नेयइति श्येनं॥
व्यतिरेकव्याप्तीतिपंचम्यंतं॥ साध्याभावेनेति॥ अत्रप्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नःसन्योवोभावः॥
प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नस्यसाध्याभावस्यव्याप्यत्वंतत्रप्रतियोगिव्यधिकरणोयंव्यतिरेकिहेतुगमकतात्प
र्याभिप्रायेणाभिप्रेतं॥ अन्यथाद्रव्यादिविरुद्धसंयोगादेरूपादिगमकतापत्तिः॥ संयोगेसाध्येद्रव्यत्वादेरन्वयव्यति
रेकिसाभावापत्तेश्च॥ अकेवलान्वयिसाध्यकहेतोःश्रुतत्वेनावश्यंसंग्राह्यत्वात्॥ अन्यथातत्रत्वेनयद्रूपेणावा

पत्तेः॥ नचैवमपि विभागव्यक्तिविशेषाभावस्संयोगव्यक्तिविशेषाभावगमकत्वेनस्यात्॥ तत्रसंयोगरूपसाध्याभावस्यप्रतियोगिसामानाधिकरण्यनैयायिकेननिरूक्तस्यगमकताप्रयोजकस्यतत्रासंभवादितिचेन्न॥तस्यकेवलव्यतिरेकिणोऽसंग्राह्यत्वेहेतुदिसहू॥येवंहियत्रसंयोगव्यक्तिविशेषः तत्रविभागव्यक्तिविशेषइतिव्यतिरेकव्याप्तिप्रमाणंतत्संयोगाभावेतद्विभागाभावसाधनेयोगेमगमकताभावः कथंस्यात्॥ इत्तरीसातस्यव्यतिरेकिण्याभावात्॥ अन्वयव्याप्तेस्फुरणादन्वयिनेवगमकत्वात्॥ नचतस्यतदाअगमकत्वेमिश्रकृत्तमेवेतिवाच्यं॥ मेघंप्रतिवह्निविरहस्तत्रधूमविरहइतिव्यतिरेकव्याप्तिग्रहेधूमस्यापिवह्निगमकतानापत्तेरविशेषादितिप्रश्नादन्वयव्यतिरेकव्याप्तिग्रहस्यरूपादेर्वह्यसंयोगविशेषादिसाधारणतयाऽनन्यगत्यागुरुणारापिनिरूक्तस्यैवगमकत्वेतत्सचासंभवात्॥ तदातदगमकत्वंसुस्थमेव॥ अतएवचधूमस्यापिनिरूक्तज्ञानादेववह्निगमकत्वंनान्यथेत्यन्तरंप्रतिभातीतिदिक्॥ अत्राप्रसिद्धसाध्यव्यतिरेकिणिसाध्येरूपप्रतियोगिव्यधिकरणत्वेनसाध्याभावस्यकथंज्ञानमितिचिंत्यं॥ यत्रूपप्रतियोगिव्यधिकरणत्वंसमानाधिकरणासंसर्गाभावप्रतियोग्यप्रतियोगिकत्वेनसाध्याभावोविशेषणीयमितितन्न॥ व्यतिरेक्यभावेछेदापत्तेः॥ नचतत्रैवज्ञानंगमकतांप्रयोजकं

तच्चक्षुःसंयोगमात्रं क्वचिद्दुष्टमिति वाच्यं॥ तत्रेन्द्रियानधिगम्यविचारग्रहविरोधिनश्चाऽव्यभिचारसहचारमात्रविषय
तयैवगमकतापत्तौ नियमाशब्देष्वप्यापत्तेः॥ अथैतत्तेनैवमदृष्टमारूपादिविशेषेणेन्द्रियसंयोगविशेष
स्वरूपादिगमकतापत्तिरेवेति॥ अनुमितिमात्रमिति॥ यद्यपि व्यतिरेकिणि व्यापकताज्ञानमात्रं हेतुः॥ नतुव्याप्तिधी
रपिनथापितस्यव्यतिरेकव्याप्तिविषयतयैवहेतुत्वमन्वयव्याप्तिज्ञानेनतुल्ययोगक्षेमत्वात्॥ अन्यथान्वयिन्यपि
व्याप्यकताज्ञानमेवहेतुःस्यात्॥ यथाचात्रेच्छाशक्तिःतथोक्तं॥ नतुतत्रापिव्याप्तिज्ञानत्वमतिप्रसक्तमितिस्वव्या
प्तिज्ञानत्वेनहेतुत्वंवाच्यं॥ तच्चेन्नव्यतिरेकव्याप्तिसाधारणमितिचेन्न॥ स्वसन्निकर्षविरोधिविषयव्याप्तिज्ञानत्वे
नहेतुत्वात्॥ यत्वत्रेयद्यपिपरामर्शोमनोदृष्टस्याप्यनुगमयितुंशक्यत्वात्॥ तस्यानुमितिमात्रयत्वहेतुत्वसंभवात्तु
विशेषदृष्टाभिधानंविरुध्यं॥ तथापिव्यतिरेक्यनुमितौव्याप्यतावच्छेदकावच्छिन्नाभावविषयत्वमन्वयानुमिती
व्याप्यतावच्छेदकावच्छिन्नविषयत्वमनुभवसिद्धंतदितिफलभेदआवश्यकःसामग्रीभेदोव्यावश्यकइत्यपि प्राय
णतदभिधाने॥ अतएवटीकादौनदैनिरासकंजीवच्छरीरमित्येवानुमितिसाकारपदार्थेनमितिभावेः॥ अतिप्रसंग
इति॥ पक्षधर्मताज्ञानंविनापिव्याप्तिग्रहमात्रादेवानुमितायत्तस्थित्यर्थः॥ अत्रचयीतिअतिप्रसंगस्थलइति

इष्ट॥ पक्षत्वेति॥ संदेहघटितपक्षत्वमित्यर्थः॥ नन्वनवगममात्रेणानासाधारण्ये॥ किंतु तद्ग्राह्यत्वग्रहणेनेत्याशंक्याह
लोकदृष्टं किंचेति॥ वैधर्म्येमिति॥ अत्रैवविवरणंजलमेदीति॥ वैधर्म्यमिति॥ पृथिवीत्वस्पर्शवत्वधर्मिकत्वादिति॥ शंक॥
नथार्थीति मिलितस्यापसिद्धेरित्यर्थः॥ आचार्यमतमाशंक्यतेऽथेति॥ ननुतेजोभिन्नत्वेसतिजलादिद्रव्यभिन्नत्वे
पृथिव्यांकथमुक्तसंज्ञायेनापिविषमीकृतंस्यात्॥ नह्यत्वेमूर्तिभोक्तृदेहानजभक्तविशेषणमसाधारणविषयत्वादित्यतआह॥ येक
विशेषणेति॥ एकविशेषणविशिष्टतयोपस्थितस्यार्थः॥ मदेति॥ अत्रत्रयोदशत्वमविवक्षितंसप्तमूलत्वेनभूतकसं
ख्योपस्थितावद्रव्यानारंभकत्वसंभवादितिभावः॥ यदिचत्रयोदशसंख्यायास्तदाश्रयेषुवसंख्योपस्थितभेदविशिष्ठ
त्वेनोपस्थितधर्मिण्यसंभवेनतावद्भेदसमुदायोविषमीक्रियतइतिदृष्टव्यं॥ एकाधिकरण्येनतावद्भेदोपस्थितयुक्तसं
ख्यानुसरणमन्यथाकारिप्रसिद्धेर्विनासंख्यस्यप्यसिद्धेर्निश्चयमूलत्वाच्च तावद्भेदरूपसाध्यप्रसिद्धिर्भवत्यतएवयेका
धिकरण्यविशिष्टतावद्भेदसाधनंकासाधारण्यनिरासार्थंजलमेदोविपक्षत्वसिद्ध्यायेतिकथांचिन्मिश्रग्रहार्थंचान्यु
थानेतोवाच्यादिद्रव्यभेदस्यजलादावप्यसत्त्वेत्रयोदशाभेदाभावस्यतत्रासत्त्वेतदसंभवयेवस्यात्॥ यासज्ज्ञप्तिरि
तिवैशिकाभावनभ्युपगमात्॥ प्रसक्तभेदसाधनेचासाधारण्यात्॥ तथाचैकाधिकरण्यावच्छिन्नस्वरूपविशेषणा

भावादिति दृष्टभावसत्वेनतस्यविपक्षत्वात्॥नतदसंभवइतिभावः॥समुदितेति।पैकाधिकरण्यावच्छिन्नेसर्थः॥सा
धनिश्चयइति॥अत्रवइतिश्रथिग्योजनादित्रयोदशभेदसंशयेसतिजलेनतत्संशयः॥नचजलभेदाभावस्येवग्र
हात्॥एकदेशविरहनिश्चयस्यसमुदायसंदेहविरोधित्वात्॥ननुमाभूत्तदातत्संशयः॥व्यतिरेकनिश्चयेपि नस्यात्
व्यतियोगिनिश्चयस्याभावनिश्चयहेतुत्वात्॥तथाचकथंतत्रव्यतिरेकव्याप्तिग्रहइतिचेन्न॥लाघवनप्रति
योगिज्ञानस्यैवतत्प्रतिहेतुत्वात्॥श्रथिग्योजनादित्रयोदशभेदसंशयेसत्यपिजलेनजलादित्रयोदशभेदवदिति
निश्चयस्यानुभवसिद्धत्वाच्च॥नचतत्रतद्व्यक्तमनाभावसंशयरूपाप्रामवंसमुदितत्रयोदशभेदाभाव।प्रसिद्धोस
यंजलेजलादित्रयोदशभेदसमुदायाभाववत्॥तदेकदेशभूतजलभेदाभाववत्वात्॥यत्पुनस्समुदायैकदेशाभा
ववत्तत्तत्समुदायाभाववदितिसामान्यव्याप्तिमूलकानुमानस्यैवसंभवात्॥नहिसामान्यव्याप्तिमूलकप्यनुमा
नेघटकृतसाध्यहेतोःसहचारनिश्चयापेक्षायथातद्वत्तदाभेत्राभाववत्समाणत्वेमेत्र योगित्वेनासमर्थमाणत्वेसति
समर्थमाणत्वात्॥स्मरणादिवद्योगित्वेनासमर्थमाणत्वेसतिसमर्थनंयत्॥तत्तदभावेवदिति॥सामान्यव्याप्तिमूलक
नुमानेऽन्यथानुपपत्त्यापिनदपेक्षायांतद्विरहस्याप्यनतदवतारइतितरां तद्विषमेऽनुपलब्धिरेवमानेत्यादितिङितं

मीमांसकेन॥ नचैवंसंशयप्रसिद्धयासदर्थस्याप्यप्तिरेकेणासिद्धिप्रसंगइतिवाच्यं॥ सद्भावोपस्थितस्यापि
यस्यप्तिरेकेऽनिष्टप्रसंगास्तेनैवसहतोप्तिग्रहादसदर्थस्यप्तिरेकेऽनिष्टप्रसंगासंभवात्॥ वस्तुतस्त
स्तुतोनुसंधानंतरंत्रयोदशाभिन्नत्वस्यतदभावस्यनिश्चयविषयत्वमपिनदुर्लभं॥ तदनुपवसायरूपेण
चनिश्चयेनतत्कारणेनाभावेऽपिविषयीकरणादितिचेन्नाह॥ यद्वासामान्येनाप्तिरनुगतव्याप्यत्वेन ह्र
दकाभावान्नानुमानोगमितिग्रंथकृतेवोक्तत्वात्॥ दुष्टानुमानेनव्यतिरेकनिश्चायकेप्रवृत्तिर्नास्तिनानुमा न
मपिनहृनयाऽहमर्थमापादयेत्तेनव्याप्तीतोव्यतिरेक्यपवतदभावनवत्तरेप्रवृत्तिर्नास्तीतिवृद्धैरसिद्धेः॥
यत्तुभनुव्यवसायेननिश्चयरूपाप्रसिद्धिरिति॥ तन्न॥ यादृशीहिनिश्चयेव्याप्तिग्रहस्तादृशीप्रसिद्धयवानु
व्यवसायस्तथाभासनात्॥ विषमविशेषणीभूतधर्मिग्रहस्यव्याप्तिधीहेतुत्वात्॥ अनुव्यवसायेनतद्ग्रहवि
शेषणत्वेनतदवगाहनादिति॥ वस्तुतस्तु॥ भेदसमुदायभावयोरवस्तुरूपस्यापिस्य॥ साध्यस्यप्रसिद्धिरेवेति नो
क्तमनुमानेनसंभवेति॥ नचसंशयरूपेवतत्प्रसिद्धिरितिवाच्यं॥ भेदसमुदायस्यतदभावस्यवाऽप्रसिद्ध
त्वेनसंशयकोटिसंभवात्॥ प्रसिद्धत्वेचतमेवव्यतिरेक्यप्तिनिश्चयसंभवादुक्तानुमानवैयर्थ्यापत्तेः॥

तस्मादन्वयेव्यतिरेकेसंशयरूपासाध्यप्रसिद्धिर्नीलंकोटिप्रसिद्धौनिश्चयरूपायामेवतस्याःसंभवान्तरप्रसि
द्धौसंशयस्याप्यसंभवात्॥नचैकाधिकरण्यनतावद्दोषस्थितयेसंशयानुसरणमितिवाच्यं॥संसर्गविध
येकाधिकरण्योपस्थितावपिबाधकतावच्छेदकप्रकारणसंशयादप्यनुपस्थितेरितिभावः॥योग्यानुपल
ब्धेरिति॥यैर्दियकस्यप्रतियोगिनोनुपलब्धेरित्यर्थः॥नयनेति।तत्रनीतौनयनोन्मीलनानेतस्मिन्नर्थः
योग्यीति॥यदेचमनोन्यान्याभावन्मनस्त्वासैतावोपिघटप्रसक्तयेवंतत्रापिप्रतियोगिसत्वविरोध्यनुपलं
भसंभवात्॥तस्मिन्नेवेत्यभावस्ययोग्यत्वादितिकेचित्॥अन्यत्तुनहितादृशोपलंभाभावंग्राह
यत्येवेतिनियमः॥प्रतियोगिज्ञानादिविरहेऽभावग्रहानुदयात्॥किंत्वभावग्रहकारणाप्रतियोगिज्ञानादि
विरहेऽभावग्रहानुदयात्॥किंसद्भावेसतियाग्यमभावंग्राह्यतीतिमनस्त्वोस्तत्राभावस्तत्रनायोग्यः
योग्यप्रतियोगिकस्यैवसंसर्गाभावस्ययोग्यत्वादतोघटसमवेतंघृतरूपवदन्योन्याभावस्तुयोग्योपिबाधाव
धिकरणयोग्यताविरहान्नगृह्यते॥अन्योन्याभावग्रहेतस्याःप्रयोजकत्वात्॥अतएवसंसर्गान्योन्याभाव
योर्ग्रहेप्रतियोग्यधिकरणयोः॥योग्यतातंत्रमितिसिद्धांतरहस्यं॥अनयोश्चकल्पयोर्विनिगमकोऽनु

भवयेवेतिध्येयं॥अनुपलब्धिश्चयादृशीअभावोपलब्ध्यंगंतादृशीमपंचिप्रसक्तप्रकाशेनचिति॥नहीदियकानुपल
ब्धिमात्रमित्यर्थः॥नचधिकरणप्रतियोगिसत्त्वस्याप्रसिध्यातेन्विरूपितस्यविरोधित्वस्यासंभवात्॥इत्तन्नुपलंधि
रसिद्धेरतआह॥अधिकरणइति॥तर्हिचेतकिंमेवतदुपलब्धौरोधित्वेनतुवास्तवमितिभावः॥तमेवतर्कमाह॥यदिहो
ति॥स्तंभेपरिपिशाचात्मास्यात्॥पिशाचात्मभेदप्रमाविषयस्यात्॥योयदाभासतदात्मनयत्रमाविषयइतिस
मान्यव्याप्तेः॥अत्रतुदृष्टांतस्तर्हीतिकिंयुक्तमाहोतुव्यतिरेकदृष्टांतोयमन्वयेतुपिशाचयेवदृष्टांतइतिदृष्टयो
येतेनापलंभपदंयदिप्रसक्तंतदाभासिधीःमदाद्यानमात्रंप्रमाचरंतदृष्टांतपादनमितिपरास्ते॥स्तंभेम
दिपिशाचतादात्म्यस्यात्॥तदास्तंभतादात्म्यवेतदुपलभ्येत॥स्तंभेमत्तास्त्येवेतचौक्षोपलभ्यतइतिव्याप्तेरित्यर्थः
दृश्यं॥नन्वकाशादितादात्म्यस्यश्रुत्याश्रयस्तारिरूपतयाजातिसाभावात्॥घटादिवृत्तित्वेपिनतदुपलंभआपाद
यितुंशक्यतइति॥तदन्योन्याभावस्तत्रकथंप्रसक्तइतिचेन्न॥आकाशादिघटाद्यात्मपदेआकाशादेरपिजातित्वा
पत्तेरवश्यकत्वात्॥तदापादनसंभवात्॥घटादिवृत्तित्वेपिनतदुपलंभआपादयितुं)नघटकर्तृत्वमपहरामाकर
त्वादेनामन्यजातित्वबाधकमस्तीतिभावः॥यद्यपिसामान्यविशेषसमवायान्योन्याभावेषुत्रयमपिकृत्योनसंभ

वेति तथापि पर्वतादिवृत्तिर्नादात्म्येनैवेत्यनुमानादनेकमिति धर्मे॥ पक्षतावच्छेदक नानात्वादिति॥ अत्र
वदंति॥ पक्षतावच्छेदकनानात्वे एकत्वेनायदा सर्वपक्षव्यक्तिर्भुयेकत्वसमूहालंबनरूपासाध्यसिद्धेरदृश्याभ
वति। तदेभयत्वाणिक्वचित्पक्षेऽसाध्यसिद्धौज्ञातायां नज्ञातःसिद्धसाधनं तदंशस्यदृश्यभूताया समूहाले
क्षनभूतायाःसाध्यप्रतीतेरज्ञातत्वात्॥ यदातुसमूहालंबनत्वं घुदासीनायाकचित्साध्यमतीति तददृश्या
भवतीतित्थासतिपक्षेउभयत्वाणितदवच्छेदेनैवमेवेति॥ पक्षतावच्छेदकेत्यणितदंशेसाध्यप्रसिद्धेर्ज्ञाते ज्ञाने तदु
दृश्यतानिष्ठत्वात्॥ तस्मादेतच्चिंत्यमिति॥ अत्रभूमः॥ पक्षतावच्छेदकेत्यंशेज्ञातःसिद्धसाधनं॥ नपक्ष एव पक्ष
तावच्छेदकधर्मसामानाधिकरण्येनकचिदपिपक्षेसाध्यसिद्धेर्हिसिद्धसाधनमेव॥ ज्ञानेज्ञातःसिद्धसाधनं॥ तादृ
शस्यैवानुमानसाध्यत्वात्तदसिद्धौतुतच्छक्यमेवनास्ति। नहिपक्षेसाध्यसिद्धिमात्रेपातधूमवत्त्वेनपर्वतेवह्निसि
द्ध्यर्थंसिद्धसाधनत्वप्रसंगात्॥ तस्मान्नेदंतघटतेवनसाध्यसिद्धावपिपक्षतावच्छेदकधर्मसामानाधिकरण्यनतदसि
द्ध्यर्थंनदोषः॥ ननुपृथिवीत्वस्यपक्षतावच्छेदकत्वात्तसामानाधिकरण्येनघटसाध्यसिद्धेःसिद्धसाधनमेवा
स्त्वितिचेन्न॥ पृथिवीत्वस्यपक्षतावच्छेदकत्वात्॥ तदिदमुक्तं सर्वपृथिवीइतरभिन्नेस्तु दृश्यमतीत्यत्रपृथिवीति

ज्ञानमेवाग्रेसर्वहेतुरूपेणपक्षनेतिकश्चित्॥पक्षसमूहालंबनानुमितिरूपेदृश्यतांपक्षतावच्छेदकज्ञाना
येपिनांशातःसिध्यसाधनमितितथैवासिसाधीषाविरहस्थलेयेवतत्रांशातःसिध्यसाधनस्योक्तत्वादिति॥ अन्य
थेति॥यद्यनुमितिविषयैकदेशःसिध्यसिध्यसाधनमित्यर्थः॥ननुधूमवान्वह्नेरितिसामान्यतोनिश्चितेवि
शेषणतत्संशयस्यापपादितत्वेपिविशेषणानिश्चितेपिसामान्यतःसंशयोनोपपादितस्तथाचसतीदंपर्वतस्येन
तेन्निश्चियेपिपर्वतस्यतेनतत्संशयप्रसंगात्॥किंचयदवच्छेदेनपक्षयत्कोटिनिश्चयस्तस्यावच्छिन्नेतत्रानेनतत्र तत्को
टिकसंशयोयविरोधिनस्तुतत्कोटिकत्वकल्पनेकोटिकसंशयविरोधि॥गौरवादतयेवधूमत्वेनव्याप्तिनिश्चयस
स्तिधूमत्वेनापुरस्थितायोग्यत्वेविशेषतोपिनव्याप्तिसंशयः॥तदुक्तंप्राक्॥यत्रयद्धर्मावच्छेदेनसंदेहोनतत्र तत
संशयः॥तच्चसामान्यविशेषवत्संपरितोषादाह॥यदुतिपृथिवीत्वेनेतिघटादिभिन्नपृथिवीत्वेनेत्यर्थः
अन्यथापक्षीकृतस्यासिधसाधनेप्रसंगात्॥अतएवेश्वरानुमानेपिप्रतियोगिविषयमात्रसंग्राहकपक्ष ता
वच्छेदकनिर्वचननिर्बंधः॥अन्यथाकार्यत्वेनातावतामेवपक्षत्वेअदोषप्रसंगात्॥नचांशातःसिध्यसाध नमि
त्येवतादृशपक्षतावच्छेदकनिर्वचनेतत्रापतथाचपक्षतावच्छेदकैक्यंतदभ्युपगंतमेवेतिवाच्ये॥एतन्मतेसिध्य

साधनमीयेवतेन्निर्वचनात्॥अन्यथाकार्यसंकल्पेमिसत्त्वयत्नावेशतःसिध्यसाधनेपरेणाद्वितेकर्मि त्वं
नांकुरादिकमेवपक्षरसद्भावनादेवविज्ञयेतवादीसभिप्रायः॥एवंमतेष्वन्वयिसमापादयतिघटसाधारणेति
अन्वयेसकृत्तगत्याहेतुसाध्यसामानाधिकरण्यग्रहावश्यंभावेव्याप्तिचारानुपस्थितिदशायामन्वय व्या
प्यप्रतिसंधानसंभवादितिभावः॥उक्तप्रकारसाकाङ्क्षादावसंभवात्तेनदर्थेप्रकारांतरमाहाभवेति॥येत्व
व्यासज्यवृत्तिप्रतियोगिकाभाववादिमतेनान्यथाजलादौतेजोवाय्वादिभेदसत्वेनत्वयोदशभेदाभावा सभा
वेनविपक्षत्वाविपक्षत्वानुपपत्तेर्व्यतिरेकव्याप्तिमहानुपपत्तेः॥प्रसंक्ष्येचसाध्यतापोमसाधारण्यापत्तेस्तद्ध्यो
स्माद्व्यासज्यवृत्तिधर्मेसाध्यतावच्छेदकत्वेतदवच्छिन्नाभावस्तत्रापसीतिनोक्तदोषः॥अतएवनासा
धारण्यमतिनिश्चितसाध्यतावच्छेदकावच्छिन्नवृत्त्याहितत्वति॥प्रकृतेचनतथा॥प्रसंक्ष्याभावस्य
व्यासज्यवृत्तिधर्मावच्छिन्नत्वाभावात्॥अन्यथाप्येवंत्रापितुल्यापत्तिः॥अतएवाग्नेयत्वंसति॥तदभी
वेयोदशायोगिन्यत्रसपक्षाभवति।नतुतदेकदेशकतिपयाभावेवा॥साध्यतावास्तावतिपर्याप्तिरिति।न
चैवंसाध्यतावच्छेदकेनान्यूनेणसाध्यसिद्धेरपिकथमितिवाच्यं॥भिन्नभिन्नाधिकरणस्थानानाधर्मप्रभावानो

त्रयोदशीत्वादिनाऽज्ञानसंभवात्॥भिन्नाधिकरणस्थघटयोर्द्वयोः द्वौघटाविति धीवत्॥ मत्वुप्रत्ययस्यासिधीः प्रत्ये
कमावृत्तो मणिरत्नत्वेनासाधारण्यमनुमितिविषयसाध्यवद्व्यावृत्तमाहितद्वति॥ सत्यतिप्रसङ्गापत्तेः
नचैवमस्मदादिनिष्ठादनुमितिविषयमिलितान्योन्याभावघटकं चसाध्यमन्यत्र नप्रसिद्धं॥ येनासाधारण्ये
त्यादि॥ तच्चिंत्यं॥ तथापिप्रत्येकभावच्छेदकावच्छिन्नेतरेतरानेनप्रत्येकाभावाभावसाधनस्यनिष्फलत्वमि त्यभा
वासिद्धेः॥ मैवंकस्यतिरिक्तस्यासिद्धेः॥सिद्धौवामेलिता मसिद्धौसर्वथातदसिद्धेरिति। केचित्तु॥असाधारण्ये
दशाविशेषे दोषइतियदातदवतारोनास्ति॥तदाकश्चिदयमर्थकल्प्यःसंभवतीयेतदुक्तमित्याहुः॥ सर्वे साधारण्ये
प्रकारांतरमाहुर्यद्वाजलमिति॥यद्यप्युक्तानुमानाज्जलभेदस्यासिद्धेः॥सिसाधयिषितत्रयोदशीभेदस्यासिद्धि
रेव॥तथापितज्जलभेदप्रतियोगित्वंसाध्यमतोनोक्तदोषः॥अन्येतु॥तेजः प्रभृति
द्वादशीभिन्नेतज्जलभेदवज्जलनिष्ठभेदप्रतियोगित्वादियनुमानंतत्रासिद्धिरित्यभिप्रेयतदुक्तमित्याहुः॥
यत्तुजलद्वादशीभिन्नप्रतियोगिकभेदभानंद्वादशीभिन्नेजलभेदस्यानंसमानसंविसंवेद्यत्वादिति॥तच्चु
च्छु॥विशेषणविशेष्यादिभेदनसमानसंविसंवेद्यत्वसिद्धेस्तत्तत्प्रतियोगिकभेदभासमानेतन्निष्ठभेदप्रति

योगिज्ञेभासतमिस्रचिन्तमतयेवगवयेगोसादृश्येनासमानेसमानसंविस्संवेद्यतयागविगवयनिष्ठसादृश्यप्रति
योगिज्ञेज्ञानंननुगवयप्रतियोगिकगोनिष्ठसादृश्यज्ञानमपि॥अन्यथाज्ञातेरपमानस्यप्रमत्वयेवंतर्भावसं
भवादनुमानांतर्भावप्रयासानुपपत्तेरितिचेन्न॥इतरभावान्योन्याभावस्यसाध्यत्वादितरभावप्रतियो गिकता
वदन्योन्याभावत्वेनरूपेणयदिसाध्यतातदाभावत्वावच्छिन्नविवादानुमानांतरापेक्षायदिचाभावप्रतियोगि कस्वरू
पभेदत्वेसतिज्ञातादिभावप्रतियोगिकत्वंयादृशान्योन्याभावत्वंसाध्ये॥यदिचेतरत्वावच्छिन्नसामा न्यान्यो
न्याभावयकमेवसाध्यंतदाऽभावभेदेपिप्रथमानुमानेनैवसिध्यतीतिमंतव्यं॥ननुभावप्रतियोगिकाभावान
भ्युपगमेनसामान्यान्यान्याभावोपिभावमात्रप्रतियोगिकयैवसिध्यत्॥नाभावप्रतियोगिकइतिचेन्न॥भावा
भावसाधारणप्रतियोगितावच्छेदकभेदनभावस्याप्यतिरिक्ताभावस्वीकारस्यावश्यकत्वादन्यथाकार्यत्वहेत्वसाध्ये
तद्व्यभिचारेणापिप्रमेयत्वादेस्तद्व्याप्यत्वापत्तिः॥कार्यत्वस्यध्वंसवृत्तित्वमप्रमेयत्वादिसामानाधिकरण्येनाभा
वप्रतियोगितानवच्छेदकत्वात्तस्मादकामनापिभावाभावसाधारणाकार्यत्वावच्छिन्नप्रतियोगिकाभावोसुप यः॥त
थेहापि॥ननुपृथिवीतरत्वस्यपृथिव्यन्योन्याभाववत्त्वस्यपृथ्वभावेनभावाभावसाधारणं॥सामान्यान्यो
न्याभावप्रतियोगितावच्छेदकंकमेवात्रदुर्लभमितिचेन्न॥जलादिभावाभावविशेषकूपसमूहालंबनज्ञानसंभवनत

स्मानविशेष्यत्वस्यतादृशस्यसत्त्वात्॥नचासावबहिर्भावपक्षेऽभावस्यैवसपक्षत्वात्तोहेतु
तिवाच्यं॥तस्यैतपक्षप्रतिसंधानदशायामेवोत्पाभिमतत्वादभावस्याभावोतरानाश्रयत्वादेव
मिसपक्षः॥तेनसममिति॥यद्यप्यभावस्वरूपभेदस्यपृथिवीजलादिस्वरूपत्वेनानुगमस्तंवस्थ्येवत
भावभिन्नत्वबुद्धिजननयोग्यत्वमस्तीतिभावः॥नचोसावयविनिघटादेरभिचारः॥पृथिव्यादिरूप
भेदस्यतत्राभावादितिवाच्यं॥घटादिरभावभिन्नरूपबाधितप्रतीत्याभेदस्येनस्वस्मिन्ननन्यगत्वा
त्॥नतुस्वरूपेण॥प्रतीतिर्वेचित्र्यस्यान्यथानुपपत्तेरितिदिक्॥पृथिवीत्वमित्यति॥पृथिवीत्वासम
स्वावच्छिन्नासंसर्गाभावरूपभेदः॥अस्याप्रसिद्धिरित्यवरसादृश्यजन्यत्वादितितत्तदिति॥योगइति॥यद्धर्मत्वावच्छ
प्यसाध्यसंबंधाभिधानेऽप्यसंतोभावस्यैवसाध्यत्वंऽन्यथाग्निमग्नेभविरोधात्॥अत्रजलत्वादिनिपतभ्रेरास्यं
त्वाभावापिसाध्यइतिनएवाभेदः॥योगामेलकइत्यन्ये॥नचुप्रत्यक्षसाध्यतायांसमूहालंबेनानुमिसा
सिध्यधीवसाधारण्येमिलितसाध्यतम्यामप्रसिद्धिरितिअनुद्याद्यासज्यतेतियोगिकुलावरादिमतमवालंब
तमिलितनामदीतिर्किंचिदिति॥चमोदशत्वसंख्यासमानधीत्वस्यतादृशापेक्षाबुद्धिविषयत्वस्यसत्त्वादितिभावः

येतेनतादृशबुद्धिविषयत्वावच्छिन्नाभावोनास्तेजःप्रभृतिषुसत्त्वेनतेषांविपक्षत्वार्थमेकाधिकरण्यावच्छेदकयेवमेलकपदार्थोवाच्यः॥सचाप्रसिद्धयेवेतिनिरस्तं॥ह्यासज्यवृत्तिधर्मिस्वसाध्याभावावच्छेदकत्वाणुपगमेनतदवच्छिन्नाभावस्यतदेकदेशाकृतिपतियाभावस्यसत्त्वेपिऽतेजःप्रभृतिषुसत्त्वेनतेषांविपक्षत्वसंभवात् रुचि.
नचाभावेषुव्याप्यवृत्तिधर्मोयेवनास्तीतिवाच्यं॥अभावेसंख्यानास्तीतिविशेषदर्शनवतःतत्रतथाव्यवहारानापत्तेः॥नचाव्याप्यवृत्तिताद्रूपबुद्धिविषयत्वेनैवसद्रूपिवाच्यं॥अव्याप्यवृत्तिधर्मिस्वप्रसेकाधिकरणविभ्रांतत्वेनयेकस्मिन्नैक्यभावेत्रमोदश्वादिव्यवहारायत्तेः॥येकत्रापिघटघटइतिप्रतीतिवत्॥अतयेवजलादित्रमोदश्वाभावानेतिसर्वेषांप्रतीतिः॥तस्मादकामेनापिनत्रव्याप्यवृत्तिधर्मोभ्युपेयइति॥तावतीति॥एव्याप्यवृत्तिसाध्यतावच्छेदकस्यतावत्स्वपर्याप्तेदितिभावःयेकाधिकरण्यावच्छेदकस्यापि मेलकपदार्थत्वेनसाध्यप्रसिद्धिरिसाह॥यद्वेतिऽप्यसंतोभावत्वादिति॥इतरनिरूपणामेधीनिरूपणाकविद्रोक्षितप्रतियोगिकासंतोभावत्वादित्यर्थः॥तेनतेजोन्यप्रमेयंसंतोभावादौनव्यभिचारः॥यद्वभावविशेष
क्षितप्रतियोगिकासंतोभावत्वादित्यर्थइतितेन्नाऽतेजोन्यप्रमेयमितिज्ञानविशेष्यव्याप्यसंतोभावेतथाविध्य

भिचारात्।जलतेजोमात्रावृत्तेस्तेताभावव्यादिसर्थत्वस्येत्यं।। किंचेति।। अत्रनिरधिकरणानामेवजलत्वादिभेदानांप्रसि
द्धौसपक्षनिश्चयात्।।प्रसक्तप्रतिषेधस्यकथंभेदसाधनेनासाधारण्यमितिहृदयं।। ननुगुरुत्वेनजलमात्राभे
दः।। साधनीयःतेजःप्रभृतिभेदश्चलिंगांतरैःसाधनीयाः।किंचेतरभेदनिषेधेनेतराभेदः।अन्यतेमाभेदाभा
वेनापिसमुदायाभावादेकत्वसंख्यैवमिलनास्तीतिप्रतीतेरन्यथाचतुर्दशभेदस्यप्रत्यक्षाभावेसाध्याभावप्रसिद्धा
व्यतिरेकव्याप्यत्वप्रसंगादित्यतआहचतुर्दशेति।।प्रसक्तादिनाप्रसक्तभेदस्यपक्षेनिश्चयेनान्यतमभेदाभावेना
पिचतुर्दशभेदस्यबाधान्नसत्प्रतिपक्षइतिभावः।।अभावपदार्थमादायचतुर्दशत्वंबोध्यं।।विरोधेनतिप्रसं
गसिद्धप्रसक्तचतुर्दशभेदविरोधेनसर्थः।।लिंगत्वेति।। नचापितत्साध्याधिकरणेजलत्वाद्यन्यतमत्वस्यलिंगस्यसे
भवात्।इतिभावः।। यद्यपिजलेपृथिवीतरभेदस्यबाधेनसिद्धिप्रसंगः।।जलेतरभेदसिद्धावितिप्रसक्तिस्तथापि
एवंदोषमेवतात्पर्ये।। अभिचारादिरूपलक्षणं।।असाधारण्यादित्यणिदृश्यं।। इच्छादीति इच्छाद्यवच्छेदकसा
दित्यर्थः।।कार्यत्वादिति।।भावेकार्यत्वादिसर्थः।।ज्ञानेति।।घटादेरपिसपक्षत्वापत्तौतताहेत्वाहःतावसाधारण्य
मित्यतआह।।ज्ञानसामानाधिकरण्येति।। आत्मघटादिसंयोगस्यघटांशेसत्वाद्दोषतादवस्थ्यमित्यतआह।।

स्यानवकारणीभूतेति।तादृशस्तत्तदेषदोषत्वादुक्तदोषतादवस्थ्यमिति।तत्तदुक्तंसंयोगेति॥आत्ममनसोः
सपक्षत्वनिरूपणायाह॥कार्यत्वमिति॥नचप्राप्तिप्रसंगः॥अप्राप्तायासंयोगस्यान्यथासिद्धतयासाधनाद्दु
ष्टत्वादिति॥वक्ष्यमाणादितिभावः॥शरीरावयवस्यसपक्षत्वनिश्चयेदृष्टान्तेमेवास्यावतारइतिमत्वर्थीयमाह॥
कनीयं॥शरीरयेवेति।यद्यप्युक्तंसाध्यकंशरीरावयववर्त्तीति तथापितत्रतत्रसिद्धौऽन्वयित्वमसाधारण्येवेति
भावः॥दोषांतरमाहासाधारणेति।दृष्टुसमवायिकारणसिद्धेसंयोगासमवायिकारणत्वशंकापिनास्तीसत आ
ह दृष्टुरिति।भावकमेत्यादिशेषः॥दृष्टुत्वमिति।युक्तिपक्षेकृदृजादृष्यभिचारःस्यादितिजातिपक्षेक मु
र्त्तेत्वेव्यभिचारादाह।निरवयवेति॥तच्चनिरवयवंद्रव्यंयद्यद्यंशतोमनोभ्यांद्वयेनतस्यनदोषतादवस्थ्यमि
तिभावः॥यत्तच्चरुपाविशेषणंनतुजातिविशेषणंअन्यथाऽमूर्त्तत्वेनिरवयवंद्रव्यंयोद्यजात्यभावेनव्यभि
चाराभावान्नदृष्टारणायविशेषदायादानानुपपत्तेः॥आत्मैवसपक्षत्वपक्षसंख्यात्वजातेरप्यभिचाराद्दृ
ष्टिविशेषेति॥दृष्टुजदृष्टमात्रवृत्तिजातेरप्यभिचारादाह।साक्षादितिसाक्षाद्दृष्टत्वंजातेरवेतिस्वरूपनिर्वचन प
रंजातिपदंयदिचतद्दृष्टपजात्यव्याप्यत्वगर्भंतन्नदृष्टुजदृष्टसंख्यान्यतरत्वादोव्यभिचारवारकमपितदिति

ज्ञेयं॥ इंद्रियत्वेननिर्देश्यं ग्राह्यत्वेविवक्षितं॥ नतूक्तमात्रग्राह्यत्वमेवेच्छातिविशेषणत्वेनिदोषत्वलक्षणं॥ सत्यं॥ किंचि
दवच्छिन्नः संयोगःसमवायिकारणमिष्टंप्रविषयाद्यादिभावादिप्रयत्नेनभोज्ये॥ अतएवतदनुकूलतर्कमाहात्म
संयोगमात्रस्यैतिनचेत्संयोगत्वादितिहेत्वसंभवइतिचा॥ समवायसंयोगत्वादिति॥ एतेविवक्षितत्वादितिशाहुः॥ य
दृति॥ अत्रोभयत्रापिवच्छिन्नत्वंतानेनसमानविषयेघटयावच्छेदकत्वस्यविषयीकरणात्॥ साध्यप्रसिद्धिरुक्त
प्रसिद्धसाधनभयेनाह॥ सामान्यतइति॥ अतएवेति॥ सामान्यतःसाध्यसिद्धौसिद्धसाधनाद्धेत्वसंभवः॥ व्य
तिरेकव्याप्तिंदर्शयति॥ स्वशरीरइति॥ ननूशरीरंसात्मकंतत्रबाधकाभावादिति॥ शरीरविशेष्यकबुद्धिरपि॥ तदनेतरंच
स्फुरत्वेसतिचेत्याह॥ उपायेति॥ संस्काराज्जन्यस्मृतिः॥ गुरुत्वाद्यजन्यत्वेपिवृक्षत्वादिवैतेनयत्नादेर्नजन्यविचारः॥ प्रयत्नेति
यात्कृतिसाध्यत्वमित्यर्थः॥ एवंचेति॥ सत्यंतन्मात्रस्यानन्यथासिद्धत्वेतत्रैवसाधारण्यमित्यतउक्तं॥ शरीरत्व
मितिं॥ चेष्टावत्त्वादिति॥ चेष्टावच्छरीरत्वादित्यर्थः॥ तेनशरीरत्वमेवेनन्यभिचारः॥ आत्मभिन्नत्वइति॥ आत्मनिसा
ध्यवत्तेऽसाधारण्यवारणायसत्यंतं॥ मृतशरीरस्यापिभोगाधिकरणतयासत्रापिकर्मसंयोगस्वत्वेनसत्त्वेतयात
तत्रेच्छावत्त्वहेतुत्वाच्चासाधारण्यवारणायात्मविशेषगुणाकारपदं॥ नचैवंदंडेचेत्॥ भोगाधारत्वेवच्छेदकधारत्वम

मपि तत्रास्तीति वाच्यं मृतशरीरस्याहंत्वस्यैवर्त्तमानचेष्टावत्त्वस्य सप्रमाकत्वलिंगत्वात्॥ मृतशरीरात्मसंयोगजन
कतदवयवात्मसंयोगमादायमृतशरीरावयवेषिसाध्यसत्वेनासाधारण्यंस्यादत्तेऽक्तं विशेषेति॥ भरीदेहसंयोगवत्तद्
क्षुजनकपरशरीरादिसंयोगमादाय मृतशरीरसाध्यसत्वेनोक्तदोषतादवस्थ्यं॥ अतउक्तमात्मेति॥ यद्यपि तस्यापि
स्वगोचरसाक्षात्कारजनकत्वेनदोषतादवस्थ्यं॥ तथापिज्ञानातिरिक्तात्मविशेषगुणाकारणाहंजन्यात्मविशेषगुण
त्वावच्छिन्नकारणत्वंवाविवक्षितं॥ अतोनोक्तदोषः॥ मनसःसपक्षत्वनिरासायाहंधीगानधिकरणात्वेति॥ नन्
दृश्यस्याप्यतदवच्छेदकत्वमित्याहः॥ तच्चिंत्यं॥ अत्रहेत्वंतरसत्वेचज्ञानत्वहेतुमादायाव्याप्यासंगत्वात्॥ तस्मात्त
द्धेतुपरतयैवव्याख्येयमितिध्येयं॥ नन्वात्ममनसोरपिहेतुसत्वेव्यभिचारइतआहाऽऽत्मेति॥ अतिप्रसं गभियाश्र
रीरावच्छिन्नात्ममनोर्योप्राकस्ययोगाहेतुत्वीयः॥ दृश्यावश्यकत्वाच्छरीरप्राणसंयोगेनैवान्यथासिद्धिरित्यर्थः॥ नन्व
नात्मतयाशरीरस्यापिभोगानधिकरणत्वेनतदवृत्तिसंयोगवत्त्वंतत्रबाधितमित्यनात्मनापिभोगाधिकरणत्वंसाध
यतिप्रभाधारत्वमिति॥ सकलेति॥ नचभोगाधिकरणयदस्यस्वरूपासिद्धिरेवरत्वेनवेष्यर्थमितिवाच्यं॥ व्याप्य
तावच्छुदकविकासत्वविशेषणतत्प्रभावादित्याहः॥ तच्चिंत्यं॥ व्याप्याश्रयस्यैवविकासित्वव्याप्यादविकासाभावान्न

नच तद्धिकसकस्यापिनव्यर्थत्वंतत्रयंनिश्चेष्यादिनियमस्यासंभवेनमानाभावात्॥अन्यथाधूमालोकान्यतरव्यर्थ
त्वादवह्वालोकादिपरस्यापिगौरवेणव्यर्थत्वंस्यात्॥तस्मादेवंशब्दवदेवंशब्दोपाधौन
वैयर्थ्यमिति॥यत्तुसकलस्मृत्तिन्यायमालेसकलवृत्तित्वेनभिचारीतितन्न॥उभयस्यसकलपदस्यावसदर्थ
येवृत्तेरिति॥ननुभोगानधिकरणवृत्तित्वमेवोपाधिःअन्यथास्वाधारत्वादीनामिसिरूपादिसमवायिभिन्न
वृत्तित्वानुमानापत्तिरित्यतआह। तार्किकरीतिरिति॥तथाचशरीरसुखमित्यादिनाधारत्वानुभवोनस्यादि
त्यनिष्टप्रसंगात्मकतर्केणहेतोःसाध्यव्याप्तेर्नोद्धारःसाध्याव्यापकत्वमतएवनरूपाधारत्वप्रतिबंदिरणि
तत्वेतादृशतर्कीभावादितिभावः। केचित्तु॥संसार्यात्मत्वंसंदिग्धानैकांतिकंसाध्याभाववत्तयानिश्चितनत्वह
तुसंदेहादित्यतआह। तार्किकरीतिरिति॥तथाचोक्ततर्कोवकाशादव्याप्तिग्रहइत्याहुः॥आश्रितत्वेति॥आश्र
यत्वेसत्यर्थः॥साध्यनिश्चयेविनेतिनत्वन्यायेतरत्वेनिश्चायकसाकल्यसत्वगर्भस्यैकचिन्निश्चयसत्वेनवसस्
मत्वोभसंवादभावादन्यथातन्निश्चायकप्रसिद्धेतदसंभवादितिभावइत्याहुः॥वस्तुतःसाध्यतावच्छेदकप्रका
रेणसाध्यप्रसिद्धिरनुमानांगं॥साचनसंशयरूपातादृशकोट्यप्रसिद्धेः॥प्रसिद्धौचानिश्चयस्तूपवसति॥तत्वं॥

प्रसिद्धिरिति॥ यत्तु श्वेतद्रव्यत्वाश्रयाश्रितेति॥ यदि सामान्यतोदृष्टावतारस्तदा दृष्टव्ये। यदि च श्वेतद्रव्याश्रितेति
सामान्येनेति दृष्टे तदा द्रव्यत्वस्य प्रकारतया तदाश्रितत्वस्य वैशिष्ट्यमयीदया भानेनाश्रितत्वरूपसाध्यतावच्छेद
कावच्छिन्नस्य द्रव्यत्वस्याप्रसिद्धतया तत्र प्रसिद्ध्युपपत्तौ विरोधादर्थं चान्वयिव्याप्युपपादनमयुक्तमिति। तस्मा द्य
दि द्रव्याश्रितत्वसामान्यतो दृष्टं। तदश्वत्वमयं साध्यप्रसिद्धिः स्यात्। अतएव श्वेतद्रव्यविशेषप्रतीत्यर्थं व्यतिरेक्य
दर्शनमेवाश्रयणीयं। तत्रैकमन्यथानिश्चयार्थमेव तदा दर्शयतीति॥ मानांतरादिति॥ वस्तुतो मानांतरादपि
ज्ञानमपि न भवति॥ अनुमितेस्तथोपकारत्वं श्वेतद्रव्यत्वस्यैवेति मादितिभावः॥ इयत्यादृष्टिरयमेवास्य सारो यु
क्तेस्तद्धीजत्वमदोऽश्वश्रयत्वादेरदर्शनेऽननुगमेन ज्ञानेतरासाध्याप्रसिद्धाव्यतिरेकेणाप्यनुपपत्तेरसम
र्थेनमयशंक्यत्वादितिध्येयं॥ अतिरेकिणि वास्तवसाध्याभावस्य व्यापकाभावप्रतियोगित्वमेवगमकं। नन्वनु
साध्याभावत्वेन तस्याप्रसिद्धिरपि तंत्रं॥ गौरवादिति ये मन्यंते तन्मतमुपन्यस्यति॥ अन्यथेति॥ अत्रास्वरसबीजं॥
अभावयत्वेवधारणेवन्यभावादेर्धूमाद्यवच्छेदकत्वग्रहवन्मुख्यदोषावस्थाप्रसिद्धविरोधात्॥ तावरूपसाध्यके
त्वादप्रसिद्धस्तिरोधाच्च॥ इत्यनवधिशेषायदत्रसाध्यप्रसिद्धिरप्यागमितिपस्याभावस्थिति। मदाशयतयाग्रेग्रमाण

स्य व्यापकत्वाभावोगृह्यते॥तदभावयेवव्यतिरेकिणासिध्यतीत्यर्थः॥तेनसुखस्यदुःखाभावात्मकतयागृह्यमा
णस्यव्याप्यंप्रकृतेयावत्रैरूप्यभावोगृह्यते॥तत्रदुःखविशिष्टानुमितिरनुभवसिध्यासमर्थितभवति॥अन्यथासुखविर
हस्यैवतत्रसिध्यसंगादित्याहुः॥दृतस्यैरस्यजलादेर्व्यापकइति।नचितरपदार्थोत्तरीतात्मादिर्व्यापकस्तथिवीत्वाभा
वस्यासंभविसंभवेवातसंताभावसिध्यरुचितयेनतदन्योन्याभावसिध्यूपपत्तेन विरोधात्॥हेत्वभावव्याप्यतयागृहीत
स्यासंताभावोव्यतिरेकिणासिध्यतीतिचेदभ्युपगमादिति चेदत्राहुः॥जलादिपदंजलत्वादितादात्म्यपरं॥नचैवंतदसं
ताभावमेवसिध्येदितिवाच्यं॥यथाहेत्वभावव्याप्यतयागृहीतस्यासंताभावः सिध्यतीतिनियमः॥तथातदवच्छिन्ना
न्योन्याभावःसिध्यतीत्यविनियमयेव॥यवंचतस्याभावरूपलक्षणं॥तदवच्छिन्नान्योन्याभावस्तदभावस्तज्जल
त्वादिरूपतयापिदृश्यः॥व्याप्याभावस्तानावश्यंभावादिरूपलक्षणं॥व्याप्यावच्छिन्नान्योन्याभावस्तानावश्यंभावा
दिरूपिदृश्यः॥केचित्तु॥जलादितादात्म्यसंताभावस्यैवजलाद्यन्योन्याभावरूपतयातस्मिंस्यविरोधः॥जलाद्यन्यो
न्याभावस्यंताभावस्यजलत्वादिरूपतयाजलादिसंताभावस्यापिजलाद्यन्योन्याभावरूपत्वात्॥यस्ययत्पदार्थसंताभा
वरूपत्वंतत्तत्पदार्थसंताभावस्यात्मा॥अतएवासंताभावतत्त्वनियोगिनःपरस्परविरहरूपतयानियमः॥नचजलजला

द्य योन्याभावस्तेनाभावस्यैवनजलस्थादिरूपत्वमितिवाच्यं॥अपतिधो तादतयेवोक्तत्वात्योन्याभावस्तेना
प्रतियोगिरूपतिरसाधारणोधर्मस्यैकनैवाभावेन तदन्योन्याभावस्तेनाभावव्यवहारोपपत्तौ तदन्यकल्पनेमानाभावाच्च
नन्वेवंजलस्वादिज्ञानेविनासोभावोननिरूप्यत॥प्रतियोगितावच्छेदकावच्छिन्नज्ञानस्यहेतुत्वात्॥तच्चतादृतरा
वृत्तित्वगर्भतादृशत्वमपितदन्योन्याभावरूपतया तादृश्यस्तेनाभावरूपंतच्च तादात्म्यतज्ज्ञानसापेक्षमितिनाभ्य
योनवस्थादिकमितिचेन्नाभावस्यावत्प्रतियोगिनिरूप्यत्वनियमानभ्युपगमात्तादृतयेवघटध्वंसाभावतध्वंसयो
रन्योन्यप्रतियोगित्वेपिनपरस्परनिरूप्यत्वनियमः॥केवलनापिघटनतन्निरूपणात्,नचतयोःपरस्परप्रतियो
गित्वमेवनेतिवाच्यं॥अन्यतरस्थितिकालेऽन्यतरान्नाशानापत्तेः॥तथाचतस्याभावस्योभयप्रतियोगित्वेपि
जलादिनैवप्रतियोगिनातन्निरूपणमितिनानवस्थादिकमितिसाहुः॥अत्रेदंचिंत्यं॥तदन्योन्याभावतत्तादात्म्यास्तेना
भावयोःप्रतीतिवैचित्र्यादभेदानुपपत्तिःप्रतियोगिभेदादभावभेदावश्यकत्वात्॥अपिचान्योन्याभावास्तेनाभा
वयोर्विरुध्यमीत्यस्तत्रैवाव्ययंभेदः॥ननुप्रागभावध्वंसहेतुर्घटोघटाभावव्यवहारहेतुरपिनचतावतावैरूप्य
मीक्षासःवस्तुतोभावस्यैवतस्याभावव्यवहारहेतुत्वेनभावस्तुतान्योन्याभावात्मनास्तेनाभावात्मनावातस्याभय

रूचि॰

व्यवहारहेतुत्वमस्तु नचैतावता विरुद्धधर्माध्यासइतिचेन्न॥ तदन्योन्याभावेनतत्तादात्म्यस्यैतावद्व्यवहारः तत्तादात्म्या
सेनाभावेन तदन्योन्याभावव्यवहारइत्यस्यविनिगंतुमशक्यत्वात्॥ घटादेश्चभावाभावेव्यवहारहेतुत्वेपिभावस्य
मेवप्रमाणबलादवसीयतइतिअतएवसंयोगासंसर्गाभावतदन्योन्याभावमाश्रित्याव्याप्यवृत्तिहेपिरोचयामे
तादात्म्यतदन्योन्याभावयोर्व्याप्योग्यत्वंसिध्यंतइतिसैषेपदः॥ अन्यत्रेत्वमत्तसंबंधिनोःसामानाधिक
रण्येनव्याप्तिरेवनामिमिमीमहे तं॥किंतुतदुभयसंबंधयोःसामानाधिकरण्यंवाच्यं॥तदुभयसंबंधिव्याप्तिःअस्ति
मत्र्यधूमसंबंधस्तत्रवह्निसंबंधइतिसंबंधसामानाधिकरण्यादग्निनाधूमव्याप्तिः॥ परंत्वाश्रयतिप्रसंगवारणायतत्
संबंधावच्छिन्नतत्सामानाधिकरण्यंवाच्यं॥ तथाचलाघवात्तत्संबंधसामानाधिकरण्यमेवतत्तत्संबंधिव्या
प्तिरस्तु॥ तदिहयत्रजलादितादात्म्येतत्रपृथिवीत्वाभावसंबंधइतिजलादिपृथिवीत्वाभावरूपसंबंधिदुमप्र
तियोगिकयोस्तादात्म्यस्वरूपसंबंधयोःसामानाधिकरण्यंव्याप्तिरितिजलादेरकृष्णत्वा॥ नचतादात्म्येनसं
बंधयेतिवाच्यमविशिष्याकृत्तेविशिष्टधीनियामकत्वादतएवतादात्म्यारोपोविशिष्टज्ञानेतथाचेतरस्यजला
देरितियथाश्रुतमेवसाधु॥ नन्वस्तुवतुतादात्म्यसंबंधःभवतुतादात्म्यसामानाधिकरण्येतद्व्याप्तिस्तथापिजलादे

अन्वयमिव्यतिरेकि किंचिन्निरूपिते अन्वयव्यतिरेकी निरूप्येत यायथेवेतिन मृषेष्यन्यतिरेकिसिध्येन्निरर्थापत्तिमानं
तरत्वनिरासक लक्षणमाह। व्यतिरेकीति॥ ज्योतिरादिवदिति। यद्यपिज्योतिरादेर्व्याप्तिमान्नग्रहकं मतुदर्थदत्ती
यमृतवर्षजीवित्वनिश्चायकं तथापिज्योतिरादेर्व्याप्यस्यसतथेतिपूरणेयंव विवक्षितइतिकेचित्॥ एतदक्षरसादे
तत्कथितंलिंगादेरूक्तमितिसंक्षेपः॥ निश्चितोग्रहाभावः ग्रहेऽभवेत्यनिश्चय इतिशेषः॥ नियमइति॥ आतवर्षे
जीवत्येकोनियमः॥ ग्रहमेवसपरः तत्कथितलिंगेव्याप्तिरूपमेकोनियमः ग्रहमेवसपरइत्यन्ये॥ आदायमविद्व
न्नूक्तेनेत्यादि॥ अदायमुक्तइति॥ नेति॥ नन्वग्रहाभावोनकरणेनियमग्राहकविधानेतस्यसंज्ञिदेग्रहा
दिसत्वग्रहः ग्रहाभावश्चेति॥ देवदत्तेति॥ जीवनबाधेतासामर्थबाधआवश्यकइतिभावः॥ तर्कोतरमाहतथे
तिं॥ तथापीति॥ मरणापेक्षमाजीवनलक्षितंतत्कल्पनार्थमेवआर्थापत्तिस्वीकारश्चास्यात्तश्चतत्कल्पितजी
वनलिंगकत्वमितिबहिःसत्तासाध्यमितिआवश्यकत्वमेवबहिःसत्वमेवार्थापत्याकल्पयेतन मरणमितितत्रा
हेशरीरमवसर्वेमिदंदृष्ट्वा॥ तनेतादृक्तर्कसहितःसंग्रामोबहिःसत्वेकल्पयतीतिनोपसंग्रहविरोधः॥ नवजीवित्व
स्यार्थापत्तिकल्पत्वेपवर्जनेपरिघातइति॥ अकृतेपीत्यत्रदेवदत्तोग्रहनास्तीतिनियमेग्रहकप्रमाणंनियम
ग्रहकपदमाक्षेपतजीवोग्रहमेवेतिनियमग्राहकं॥ तथासतिबहिःसत्वेप्रमाकुत्रापिनस्यात्॥ ग्रहमेवेतिनि

यमग्राहकस्य सर्वत्राभ्रान्तत्वादिति भावः॥ यद्वेति सर्वदोषाभावोनहेतुः॥ विप्रतिरोहितप्रमाणशक्तिकस्यप्रमाहेतु
त्वंतद्विरहस्यादृतस्थप्रमा विरहस्यभिहितमूलत्वदोषाभावोपिप्रमाहेतुस्तद्विरहस्तद्विरहस्तत्रकुत्र्यतइतिनेष्ट
वीभेदः॥ प्रमाणान्तरमिति मंतव्यादिस्त्रत्रशतवर्षजीवीब्राह्मणोयंवेतिनियमग्राहकस्य शतवर्षजीवित्वरूपविशेषप्रबाध
द्वाधाभिमतसिध्यर्थं॥ तदनुसंधानमिति विरुद्धार्थग्राहकस्वरूपलिंगप्रतिसंधानमित्यर्थः॥ अबाधपर्यंतादि
त्यविलंबपर्यंतादित्यर्थः॥ दृश्यतेचतदनुसंधानेविनातत्रविलंबइतिह्यपितदवश्यंस्वीकरणीयमितिभावःव
स्तुतस्तुकचित्कालेलब्धवीर्यान्तरसंशयादिदुर्लभत्वात्सर्वत्रतमबाधानुसंधानाभावात्यान्यपुनःसंशयासंज्ञानमपि
येवंचतस्यकल्प्यप्रमाणाभावात्यद्धिप्रमाणाभावस्यसामान्यतोदृष्टेनपुनरवतारोलाघवात्कल्प्यतइतिभाव
लिंगानिश्चयार्थंसामान्यतोदृष्टेतरमाहापिचेति॥ नचप्रत्यभिज्ञालिंगप्रतिसंधानंतत्क्षणेतिभ्रमइतिवाच्यं॥ अ
न्यतरव्यक्तिंविनाविनिगमकलाघवादितर्कानवतारात्॥ एवंचोक्तभ्रान्तिभावः॥ विशेषविघटकत्वादिति॥ जी
वनविषयत्वादिस्यर्थः॥ तथाचविरोधिविषयतयामरणानुमानेनसत्वंतिपक्षंसिध्यतीति॥ अन्यथाअन्यतर
त्वेग्राहकसामान्यतोदृष्टेविरोधात्॥ सत्वंतिपक्षमवनस्यादितिभावः॥ जीवनग्राहकस्यऽद्येतिज्ञात्वाकथि
तेरण्यादिलिंगस्यसर्वत्रतिषवेतीरण्यवेतीयवह्निमान्धूमवत्वादियादिनापतिबंधस्यादिस्यर्थः॥ जीवनग्राहक

स्येति॥ अत्र देहचिह्ने विपक्षबाधकतर्कोनवतारेसामान्यतोदृष्टस्यापिनजीवत्वनिश्चायकत्वंस्यात्यविशेषात्। त
दवतारेचज्योतिःशास्त्रकथितलिंगादेरप्यकोवाबाधकाऽऽपद्येतनिश्चयसंभवेकिंमयानसामान्यतोदृष्टेने
ति॥ तस्मादिति॥ अतुल्यबलेननसत्प्रतिपक्षत्वमितिभावः॥ सचेति॥ प्रमाणत्वाभिमतयोर्द्वयोरविरोधस्या
दितिचपरकीयैरीक्षणागुप्तमरणोपक्षमाजीवनेऽप्यतिलाघवंज्योतिःशास्त्रमथार्थसंचविनिगमकंक्षप
क्षद्वयं॥ अन्यमीमांसकाइत्यर्थः॥ अप्रमाणास्पीति॥ सथाचयत्रजीवीगृहयेतिवक्तातोऽप्रमाणमपिप्र
मापत्वेनज्ञायते॥ तत्रापिपुरोधिर्वहिःसत्वमेवकल्प्यत॥ नमरणमित्यर्थः॥ किंचेतिमृतेमरणंगृहस्थितंग्र
हसत्वमितियथायोगंज्ञेयं॥ अत्रेष्टापत्तिमाशंक्याह॥ अथोपपत्तेति॥ अन्यदुक्तंचेत्साध्यंथोपपत्तिमात्रेवनस्था
दियंतमेकंग्रहंप्रत्यर्थः॥ अप्रमाणत्वादित्यस्यानंतरमितिःपूरणीयः॥ तेनेहतुल्यबलयतेरसाधुविशेष्यसिद्धिमूलक
मनुमानमुक्तसामान्यव्याप्तिमूलकमनुमानमाहविद्यमानत्वेसतीति॥ द्वितीयमध्यानेदूषयति॥ सामान्यत
इति॥ यत्वयैतत्तत्रयावन्तुरंगमान्नव्याप्तिग्रहइतिभावः॥ स्वोक्तदूषणावंडनेसंमतिमाह॥ तदुक्तं॥ यतान्वयमि
ति॥ यतःकतःकल्पनीयादन्यत्रेतस्यान्यत्वप्रतियोगिनोपिभेदेयमतःसिद्धेःतस्मोऽर्थोपपत्तेःअसिद्धेः॥ प्रमा
णत्वासिद्धस्तत्रत्वेनाभिमतस्यान्यत्वप्रतियोगिज्ञानस्यप्रमाणांतरादेवज्ञातत्वात्॥ इत्यर्थः॥ यद्वायतःकल्पनी

भोजनोपस्थापकमित्यर्थः॥ तेनेति॥ रात्रिभोजनेनेत्यर्थः॥ योग्यतावच्छेदकरूपोपस्थितिं विनानुभाभ्यर्थधीरि
त्यत्र प्रपञ्चरसमेति माह॥ यथेति॥ उपस्थितस्य योग्यस्य योग्यतानुभाभ्यर्थधीः नतूपोग्यतावच्छेदकरूपेणतस्या
पस्थितिस्तत्रेत्यर्थः॥ गौरवादिति॥ सिद्धान्तमाह॥ बाधकेति॥ ॥ अर्थापत्तिवादः समाप्तः॥ ॥ ॥ न्यायस
ध्यमित्यत्रलक्षणं॥ तदवश्यमवसाध्यमित्यपि द्रष्टव्यं॥ तेनतदवश्यवाभ्रेतिनासंगतमितिभावः॥ उदाहरणोपनय
रूपमेवमवश्यमेवेदमित्यनुमितिबोधाः॥ उदाहरणात्तमवश्यवचयमित्यनुमितीमांसकादितंन्निरासेहृदि निधायाह॥ प्रतिज्ञ
त्ति॥ पंचानामपि यथायोगंतत्र तत्रोपपत्तेः॥ समस्तकश्चेति॥ रूपंपक्षसत्वादिकमिति॥ अनुमितिचरमकारणा
त्मकमनुमितिजनकंतत्तदाविज्ञानानंपक्षत्वंप्रमाजनकत्वंजनकज्ञानजनकत्वं॥ आद्यज्ञानंयदंचरमकारणंपरामृ
र्शोन्यूनविषयकज्ञानपरंअवह्निव्याप्यवानयमित्यासवाक्यंतिव्याप्तिवारणायप्रमेतिकोक्तं॥ परामर्शजनकत्वं
शब्दोनदेशसंभवः॥ नचैतज्जनकत्वंविशिष्टवैशावगाहिज्ञानजनकवाक्येसंभवतितस्यज्ञानस्यमानसत्वादिसत
त्वंजनकजनकेतिसंस्कारदूषणंपरामर्शजनकजनकेएवोक्तासवाक्यंतिव्याप्तिवारणायज्ञानेतितेजन्य
ज्ञानस्यापेयुक्तिंविजनकज्ञानजनकत्वसंभवादुक्तदोषतादवस्थ्यमितिमत्वाह॥ अनुमितिचरमकारणेति
लिंगपरामर्शपदंचस्वरू[illegible]नगरे[illegible]ष्यमनानयमितिवाक्यावयवा वयंचेतिज्ञानंवारणायज्ञा[illegible]

नपदे" तदर्थस्तूक्तएव" आत्मादावतिव्याप्तिग्रहवाक्येति॥ यदिचैवमसाधक तात्पर्यमेतत्तिव्याप्तिः॥ तत्रवाक्य
यदमेवमहावाक्यपरंबोध्यं॥ अन्येतु॥ अत्रशुद्धपदंकर्तृकोश्चारणरूपन्यायमपिनेतिवाक्येतिव्याप्तिवारणायत
त्पदमितिचरमकारणपरामर्शजनकयाप्तिज्ञानादिजनकयोग्यताज्ञानजनकतया तादृशपरामर्शेजनकत्व
मजनकत्वज्ञानजनकं॥ नायमाभासदशायेनेत्यादिवैशिष्ट्यधीजनकयोग्यताज्ञानजनकान्नचशुद्धपद
ज्ञानेऽपिदोषः शुद्धज्ञानत्वेनतादृशपरामर्शप्रयोजकत्वस्यविवक्षितत्वात्॥ नचयोग्यतानेतद्धीजनकेयोग्यता
ज्ञानत्वेनजनकत्वात्॥ नायंजडोयज्ञानेतुशुद्धज्ञानत्वेनैवजनकत्वंवाधृतप्रकारयोर्जज्ञानयोरुपरामर्शेस
मर्थीसत्वात्॥ अन्यथाशोकत्वाद्वाक्यादुद्भिद्यमानोयमितियरामर्शस्यैवाहार्यासत्तेरिदाकारमेवानुपदंस्फुट
त्वात्॥ एवंचसएवात्रवाक्यार्थोद्भिद्यमानोयमितिवाक्यावयवावयवेतिव्याप्तिवारणायवाक्यपदे॥ महावाक्य
परमित्यादुः॥ नचपर्वतेवह्निःधूमोयतःधूमश्चवह्निमन्तरानुपपत्तिःअनुपपत्तिश्चतादृशेधूमेपर्वतवृत्तित्वंनसाद्
ग्निःपर्वतःवृत्तिःइत्यादौन्यायसमानार्थकन्यायानात्मवाक्येतिव्याप्तिरितिवाच्यं॥ तादृशवाक्यस्यसर्व
तांत्रिकसंप्रदायविरुद्धत्वेनव्याकुलीभावात्॥ कथमिदंप्रयोगाःसर्वेसंप्रदायमवमन्यकृता
नेनेतिचेन्नजडेजडाप्रयत्नयाचतद्वाक्यंयेविद्यैवेत्यादिवाक्यावगाहिज्ञानानुत्पादेनतत्स्यानुपपत्तेःचरम

कारणपरामर्शीप्रयोजकज्ञानजनकत्वादिसाह॥ तेनचेति॥नचात्रमानाभावाच्छाब्दज्ञानसहकृतमेवमनु
परामर्शोजनकंस्यादितिवाच्यं॥तस्यानासोक्तऽपेनाप्रामाण्यशंकायांतत्परामर्शीजनकत्वात्॥अन्यथाआस
वाक्यजन्यज्ञानादिवन्यायजन्यज्ञानादेवानुमितिरापत्तेः॥तस्मात्न्यायजन्यज्ञानेअप्रामाण्यशंकायांतस्यकार्यतंच त्वं
नतदुपस्थितेरनुसंधानंस्वयंमनसाधूमविशिष्टवह्निविशिष्टमिताकारज्ञाननेनेतेनपरामर्शोहादृतिस्वीकार्यं
तद्वाक्यस्यपदार्थमात्रोपस्थापकत्वेनप्रयोजकत्वादितिवदंति॥अन्यत्तुमानांतरमनालक्षणामुभाष्यते।सात्म
रूपसहकारिसंपत्तिः।क्रियतइत्यर्थइत्याहुः॥अनुमितीति॥अत्रप्रथमशाब्दज्ञानंन्यायजन्यज्ञानपरं॥तथा
चन्यायजन्यज्ञानजनकंशाब्दज्ञानजनकवाक्यत्वमित्यर्थः॥अत्रचन्यायशब्देनहेत्वाभासव्यावृत्तिवारणायन्या
यजन्यज्ञानजनकेति॥नचावयवावयवत्वव्याप्तिः॥तस्यन्यायजन्यज्ञानजनकजनकत्वेनतदजनकत्वात्॥अतएव
वक्ष्यंतेकथंरूपेणवाक्यंनातिव्याप्तिः॥तस्यापिन्यायजन्यज्ञानजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानजन
कत्वेनसजनकजनकत्वात्॥शाब्दपदंसंपातादाप्तं॥आप्तादावतिव्याप्तिवारणायवाक्यपदं॥येतत्वलक्षणा
यन्मतेअवांतरवाक्यार्थज्ञानस्यमहावाक्यार्थज्ञानकरणत्वमुपगमः॥तन्मतेइदंबोध्यं॥यदिचतावत्संस्कार
मेलकत्वेनावसदस्मृतौतावसदर्थकत्वं॥अथमहावाक्यार्थज्ञानमित्यप्युपगमः॥तदास्यासंगतत्वंप

साध्यसामानाधिकरण्याभावेनातिव्याप्तेरसंभवाच्च। यदि चतस्माद्वह्निमानयमित्याकारकनिगमनेतरत्वमितिप
दस्यसर्वनामत्वेनबुद्धिस्थत्वाच्चकतपदार्थतत्वप्रकारकज्ञानजनकत्वान्निगमनत्वलक्षणायाअतिव्याप्तिवारकत्वंतस्यतिथे
यं। एवंचनन्मतेनिगमनात्वंवाक्यत्वेसतीत्यपिविशेषणीयमुक्तावह्निमानयमितिनिगमनेकदेशेनातिव्या
प्तिरितिदिक्। नचशब्दपदवैय्यर्थ्ये।। घटउद्देश्योगुणादयकर्मान्यत्वेसतिसत्वात्।इत्युद्देश्यतावच्छेदकरूपेणैवशब्दोदृष्टान्तत्वेनोपादीयतेतत्रातिव्याप्तिवारकत्वात्।नहितस्यपरामर्शप्रयोजकत्वाद्दृष्टान्तजनक
त्वेनअपितुस्वज्ञानजनकत्वेनैवविवक्षितं॥ तल्लक्षणंतथाजनकत्वमितिवदंति॥ तच्चिंत्यं॥ तस्यप्रतिज्ञात्वे
नसंग्रहात्तद्विषयकस्योदाहरणस्याप्यूनातिरिक्तविषयकत्वाभावेनातिव्याप्त्यसंभवात्तस्मात्सेपाता
यतंशब्दइष्टं।अथपक्षसाध्यवाचकपदेष्वेवलक्षणासत्वादतिव्याप्तिरित्यतआह॥ वाक्यत्वमितिथावता
दृष्टज्ञानजनकपदसमुदायत्वमितिसंक्षेपार्थः॥ वाक्यपदसपदसमुदायवाचित्वादिति॥ नचप्रतिज्ञाकंजानत्वक्ष
णतयाऽदृष्टेऽनुमितिरितिरिक्तविषयकज्ञानजनकत्वादसंभवइतिवाच्यं॥ वह्निमानित्यस्यहेत्वन्वयानुपपत्ताव
नलक्षणोक्तौहेत्वन्वयप्रकालिकमुख्यान्वयबोधमादायलक्षणासंभवात्॥ केचित्तु॥ ज्ञानलक्षणेवतत्रने
त्याहुः॥ ननुसर्वंप्रमेयमित्यादिप्रतिज्ञायामव्याप्तिरनुमितिविषयातिरिक्तप्रमित्यप्रसिद्ध्यातत्राप्यतिरिक्तत्वाप्र

सिद्धेः॥ नचैतत्त्वविवादाभावेनसंशयाभावेनचप्रतिज्ञासंभवान्नोक्तदोषइतिवाच्यं॥ अनुमितिसमानाद्रूपू
योगसंभवात्॥ भिन्नप्रकारकसंशयाद्वाऽन्यथाकेवलान्वयिहेतुलक्षणमप्येतन्नविरुध्येत॥ सर्वंसर्ववेदार्थं
वृत्तिधर्मविशेषत्वादुक्तत्ववदितिसाध्यप्रतिज्ञार्थांतरमप्रतीकाराच्च॥ नह्यत्राप्यकेवलान्वयिसाध्ये॥ येनविवा
दादिर्नस्यात्॥ सर्वपदार्थस्यानुमितिविषयतयानतिरिक्तप्रसिद्धिस्त्वापीतिचेत्॥ अत्रोच्यते॥ अनुमिति
न्यूनानतिरिक्तविषयकपदेनअनुमितिविषयतासमव्याप्तिविषयतायाःक्वेवविवक्षितमितिनोक्तदोषः॥ यद्वाय
त्तदखासादृहलिंगमिति॥ प्रतिज्ञायामग्निमानिति दोमत्वर्थसंबंधस्याप्रिमानादनुमितौतद्भानमानाभावात्
तदनतिरिक्तविषयत्वमसिद्धमित्यप्यस्वरसः॥ एवत्रबोध्यं॥ अत्रापिसंशेनन्यायप्रवेशवाक्यपरंदासीनवा
क्येतिन्यायनिवारणाय॥ अन्वयवाक्यंतरवारणायलिंगविषकेति॥ ग्राह्यपदस्यकार्थं॥ प्रतिज्ञैकदेशादावतिव्याप्ति
वारणायवाक्यपदं॥ अन्वयव्यतिरेकवाक्यंतरं॥ लिंगविषयकज्ञानजनकत्वंतुनक्लृप्तासंनलिंगवि
षयकज्ञानजनकत्वनीतावन्वयव्यतिरेकवाक्यलक्षणेनोदाहरणादिचलुप्तायान्यावयवत्वेपर्यवसितं॥ अन्यथायत्रप्रति
ज्ञायांहेतोःपक्षतावच्छेदकत्वेनान्यथावाप्रवेशःतत्राव्याप्तिःस्यात्॥ नचलिंगतावच्छेदकप्रकारेणलिंगावि
शेषेवनोक्तदोषइतिवाच्यं॥ धूमत्वादेःपक्षतावच्छेदकत्वेतथाच प्रतीकारात्॥ धूमत्वेनैव॥

तत्र भूमस्यभानात्॥ नचविवक्षितोपितादृशज्ञानजनकत्वनियमोयदिस्यात्तथवच्छेदेनविवक्षितस्तदाताद्रूप्य
तिरायेनतथेवान्यत्रापिः अथानुगतरूपवत्त्वाद्यवच्छेदेनतदाप्रतिसन्धानमवच्छेदकमादायपक्षतनेवसमर्थने
मस्त्विति वाच्यं॥प्रतिज्ञाहान्यवलक्ष्यत्वेनतदप्रसिद्धेश्चयेतदाद्यसमर्थनस्यानैकान्त्यात्॥हेत्वन्तरमाहलक्ष
णान्तरप्रसिद्धेश्चनतदवच्छेदेनलिंगविषयकज्ञानजनकत्वनियमसम्भवाद्दुरुक्तलक्षणार्थेसंग्रहइतिभावः॥ट
तोपिनिगमननास्तिरित्याहुः। निगमनंचेति। चकारोप्यर्थोपिंन्नक्रमः। निगमनेपरामर्शहेतुरपिनयर्थः
तथाचसतेतस्मिन्हेत्वर्थेरपामर्शनिरूपकत्वसम्बन्धेनेतिभावः॥ नचैतदेवासिद्धमितिवाच्यं॥परामर्शपदेनापनयजन्यपरामर्श
स्यविवक्षितत्वात्॥तन्निगमनस्याहेत्वनेनाप्रयोजकत्वात्॥प्रतिज्ञायाश्चाकांक्षाभाजनद्वारातत्रप्रयोज
कत्वमस्तीतिनैवमसंभवतीतिधर्मः॥अवयवत्वंचपरामर्शेनोपदर्शनोपनयजन्यपरामर्शेपरंतुन तल्लक्ष
णास्यनिगमनेनाव्याप्तिरित्यपिदुरुक्तम्॥अतएवपरामर्शेतिचरमपदंविरोक्षणं॥इहतुनतिसंबंधेसुस्थं॥हेत्वित्यहे
त्वर्थः॥यद्वावाक्यपदमवयवपरमितिनातिप्रसंगइतिभावः॥लिंगेति॥अत्राप्यनङ्सासनश्चैवलु
लिंगविषयकज्ञानजनकतानियतावयवत्वमित्यर्थः॥यदिन्यायावयवपदंनास्तिकत्वावयवपदंतदातदे
वावयवपरंहेत्वंशे॥लिंगिपदंचक्काचिक्कं॥अफलेहेवंविजातीयतानंनिर्बीजमुक्तं॥इदानींबीजमुक्तं॥

परमतमाह ॥ अवयवादिति ॥ भास्करमतेदूषयतिपेतेनेति ॥ यद्यप्यविज्ञातीतलक्षणकत्वमेवपक्षेविशेष्यतेतत
थाप्युपाधिभेदात्भेददृष्टिमतभ्रमे ॥ आवृत्तौचेति ॥ दृष्टंचापातत उक्तलक्षणानुपपत्तिप्रतिपत्तायेज्ञा
नलक्षणवाक्यंविप्रतिपन्नौतुनतथेतिनतयातदन्यथासिद्धिर्नचप्रमाणकृत्यहेत्वभिधानाधूमादिहेतो
रपवत्वयवयंचमीतिनाक्यानुपपत्तिरितिवाक्यं ॥ लक्षणाप्युपपन्नौहेतुवक्तृकमाःयंचम्याःनानार्थ
त्वकल्पनायामनाभावादितिवक्ष्यते ॥ तदभिधानमिति ॥ अवयवोक्तेरभिधानमित्यर्थः अन्यथेत्यस्यस्वर
सोद्भावनेनहीजेतुशक्तानित्यत्वप्रमाणवदस्यस्यऽपलक्षितसाधनाभिधाननियोजयतमाप्युपपन्नोसा
ध्यविशेषणत्वमुक्तंपुनर्यवष्ठभेनग्रंथेन ॥ तथाचसेवाक्तंकिमनेनेति ॥ अतमेवोपसंहरतामेवदर्शयति
तस्मादिति ॥ हेत्वंशेचेति ॥ हेत्वसत्त्वन्यायमूलत्वाक्यंत्याप्तिवारणायकारणोपन्यासेधीविशेषणंतस्मा
दिति ॥ निगमनाद्वेतद्वारणप्यसाध्यविपर्ययेति ॥ अत्रसाध्यतावच्छेदकप्रकारणसाध्यविपर्यसंविवक्षि
तंचेत्तेनप्रमेयत्वादोसाध्यनसाध्याविपर्ययज्ञानस्याप्रसिद्धिरितिभ्रमं ॥ नचैवमपिवाय्वादिप्रसङ्गः प्रसक्त
प्रतिषेधेदृष्टान्तेहेतावव्याप्तिरितिवाच्यं ॥ साध्यविपर्ययकज्ञानेधीजनकत्वनियमावभिन्नस्यविवक्षि
तत्वात् ॥ योयोधूमवान्सोसावग्निमान्हरणाद्वेतिव्याप्तिकरणायहेतुविभक्तिमदितिसामान्यवचनसप्तम

स्यतथात्वाभावात्। सामान्यवत्त्वेसतीत्यादिहेतौसतिसमीचीनलक्षणविशिष्टयथाहेतुलक्षणमेवनविशेष्यमात्रेणाविशेष्य
मात्रेणवातद्वचनादिभावः॥ यत्तुधूमोयंतद्दर्शनादवतिष्ठमानोग्निंस्मारयतीत्यनुमानहेतुलक्षणमितिमतं। नहिपंचम्यंतेन मात्रे
णतदाकांक्षानिवृत्तिः अपितुपथमोपेतपंचम्यंताभ्यांहेत्वर्थवत्त्वेपंचम्यंतेनैवेति तन्न॥ तस्यानवयवत्वेनतत्रप्रति
साध्यविरहेपिदृष्टसंनिवाक्यवत्त्वेप्रतीतेर्नैवव्यापत्तेः॥ अवयवत्वेचतद्व्यापत्तेर्हेत्वादिति पंचम्यंतेति या
पाशविकहेतुसद्भावेतियाप्तिव्यापत्तेः। तस्मादितिसर्वनाम्नोबुद्धिस्थवाचकत्वात्तयातस्यबुद्धिविषयेशक्तिरयंतद्विषयत्वेलक्ष
णायाअप्यसंभवेनसर्वथातत्रलक्षणाया अयुक्तत्वेः प्रतिसाध्यमपिसोमपदलक्षणापत्तितत्रापि व्याप्तिरतएव
ह॥ पंचम्यंतेति। नचतत्रलक्षणायामनुभावः॥ साध्यस्यहेतुवाक्यार्थेहेतुनाक्यासंभवात्॥ तस्यतत्कार्य
त्वात्॥ अत्राहुः॥ नहिहेतुवाक्यनकारकंहेतुरपिधीयते। किंतुसाधकत्वेसाध्यनिर्देशानंतरंतद्धेतुप्रमाणकोक्षा
मात्रमेवतत्रमार्गात्॥ पंचम्याअपितत्रज्ञापकत्वस्यहेतुत्वपरत्वात्॥ तथाचहेतुवाक्यार्थेज्ञापकेसाध्यस्यसाध्य
विशेषणत्वेनैवान्वयइतिनसाध्यपदंलक्षणा॥ अतएवभस्मारुढोतथैवकुंडतःप्रतिपादितमस्तिएवंस्त्री
नुसिसन्यूनेत्यादिगर्भेप्रतिज्ञालक्षणेक्तवतोगंगेत्यत्रापियेतत्त्वाभिमतंअन्यथाप्रतिज्ञायाअसाध्यत्व

नविषयेऽनुमितेश्चानर्विषयत्वेतल्लक्षणासंभवादिति। अत्रवदेतिपंचम्याः प्रत्यक्षत्वपरत्वंलक्षणमात्रस्यावा।।
न्यः। सुश्लिष्टेतिलक्षणस्याऽव्याप्तेः।।नांशः।।येकार्थत्वेसंभवतिनानार्थत्वेप्रमाणाभावात्।।प्रतिज्ञालक्षणाच्च
यथासूत्रंतथोक्तेः।।यत्तुयदिप्रतिज्ञायांनलक्षणंतदापंचम्यंतपदमत्रलक्षणेव्यर्थंस्यात्।।नचपदिवासनउक्ति
लाक्षणिकपदवदयमवान्तरेतिव्याप्तिवारणायतदितिवाच्यं।।लाक्षणिकपदवत्वेनतादृशपदनियतानुमितिपरत्वा
वश्यंस्वीकार्यत्वेननतयेवतादृशावयवंनरूवारणायैवं।। अन्यथात्रयोऽवयवाविशेषधूमवत्वादितिहेतुवय
वयेवदृष्टान्तेनाधादीयते।।तदातदंशेतिव्याप्तिर्वज्रलेपवत्वापातान्नचप्रकृतसाध्यप्रतियोगिकहेतुपंचम्यंतगर्भ
तयोक्तेतिव्याप्तिरसंभवः।।तत्रयोगृहीतावयवेतस्मिंयोदाहरणोदृष्टान्तस्तत्संभवादितितेन्न।उदाहरणाऽविषयीभू
तमहानसत्वेनसंग्रहात्।।तत्रतिपादकस्यादाहरणांशस्यधूमवत्वादितिद्रव्यादिसाद्मिहानसवदिसादिव
त्प्रमेयपंचम्यंतसाभावेननियमविवक्षायामनुपपन्नात्।।लाक्षणिकपदत्वमुपपादयतिहेत्वितिअहेतुश्चेन्नेति
ऊतीतावेवमिचारादितिभावः।।नचैवंस्वार्थेतद्ग्रहयोगइतिन्यायाद्धूमवत्वादितिद्रव्यादिसाद्मिहानसादिद्रव्य
त्तिर्वन्निरूढलक्षणायाज्ञानज्ञानलाभायत्तेः।।नतुहेतुपदंयदिज्ञानलक्षणंतदाहुत्तिरयंविशेषज्ञानमात्र
सुपतिष्ठेत।।नतुविषमाधूमवत्वादिःतथाचानुपस्थितेतत्रगमकताकांक्षाज्ञानस्यात्।।प्रकृतलिंगज्ञानगमकतस

कांक्षास्यादितितस्यैवगमकत्वप्रयोजकत्वात्तादिविषयत्वमुदाहरणाभिधेयेप्रसञ्जनेन।किंचावयवेनअमुमिमंगंज्ञान
मुत्पादयितुमर्हलिंगज्ञानेचतेयानतुलिंगज्ञानंतस्मालिंगस्यानुमितिजनकत्वपक्षेपिधूमादिपदंदृष्टांतमात्रमेव
चमीचनहेतुतायामितिहेत्वज्ञानविषयत्वलक्षणोऽनुमितिप्रयोजकत्वमात्रइतिचेदत्रवदंति॥यद्यवेवृत्ति
र्द्वयविरोधेलङ्घदाषाकांक्षमिस्यनचितंस्यात्।अथेदाषचारणिवृत्तिर्द्वयविरोधेनरत्नस्यानुपस्थितावृतो
रत्नाकांक्षाविरहात्॥मदिचतत्स्थतयापितत्राकांक्षायदिवायधियेनविनाभासतइतिन्यायात्तलक्षणांविना
प्यन्यलक्षणयैवतद्व्यस्थितःतत्राकांक्षातदाप्रकृतेपिसमानं॥तद्विषयकज्ञानस्यापितन्निरूपणाधीननिरूपणा
त्वेनेज्ञानलक्षणायैवतदुपस्थितिसंभवात्॥अतएवसमासेऽन्यपदार्थलक्षणादौलक्षणादिविशिष्टशक्ति
भानं॥नचैवमुपस्थितस्यापिविषयस्यविशेषणात्वेनैवज्ञानंगमकत्वाकांक्षास्यादितिचेन्न॥एकायत्तः
गमकत्वंहिज्ञानजनकत्वंतच्चलिंगज्ञानस्यचेतुलिंगस्यतथात्वेकथमस्यजनकत्वमिसाकांक्षायितत्रैवयास्यिवे
क्षतयाचेतस्यगमकत्वमितितद्विषयीभूतेलिंगेव्याप्युपदर्शनायउदाहरणमपेक्षितादृश्संगछते॥अस्तुवालिं
गयवाकांक्षानथापिनानुपपत्तिः॥लघवेनतदुपस्थितिमात्रस्यैवतत्रतेनविशेषणतयोपनीतेसत्स्व
योजकत्वात्॥यद्वोक्तंचमीचनहेतुतायामिस्यादितंन्नहेतुत्वंउक्तंयाःपचेत्याविवक्षितार्थलक्षणायत्तः॥

वक्षितमितियाद्ये॥केवलान्वयिहेतौमात्रपदमवच्छेद्यव्यतिरेकमात्रेसिध्देरितिचेन्न॥अन्वयव्याप्तिप्रति
धायकावयवमात्राभिधानप्रयोजकतिवदिधात्॥नचैवंमात्रपदमवच्छेद्याभावःव्यतिरेकव्याप्तेरभावेण
विशेषादशेनदर्शनदर्शयोरनर्थक्यमवप्रसिध्देस्तत्प्रतीतिजनकत्वेवतदभिधायकत्वात्॥दृश्यविश्व
षेणान्वयिव्यतिरेकिहेतुःसंग्राह्योवेत्याहुः॥नचकेवलान्वयिनिसंग्राह्याभावेनव्याप्त्यभावतारात्॥तदीयोहेतुः
संग्राह्यानास्त्वेतिवाच्यं॥अनुमित्सयापिप्रयोगसंभवादितिभावःपक्षेति॥पक्षसपदमतोर्थस्यप्रति
पादकाहेत्वमवदस्यर्थः अनहुविषयकयेहेत्वयवसंग्राह्यइतिस्वरूपासिध्देविपक्षेवारणायपक्षपदं
येनत्वयेलक्षणं॥अबाधितत्वंचेविदुच्यं॥असाधारणविषयकवारणायव्यतिरेकहेत्विति॥अनिवार
णायचसपक्षपदं॥व्यभिचारविरुध्धविषयकवारणायाकेवलान्वयिहेतुवारणायचविपक्षव्यतिरेकि
वमग्रिमलक्षणेबोध्यं॥यदिचेन्नमायनदीवेतदावारणीयंहेत्वमवस्यपदांतरेणवारणात्॥प्रथम
लक्षणेपक्षपदंद्वितीयलक्षणेपक्षसपक्षपदंवानर्थकमायद्यतदितिभावः॥दृश्यविश्वान्वयिसाधारणहेतु
णामाहानुमितीतिउच्चकारणात्तुदासीनवारणायतत्समादितिनिगमनंजातिवारणायसाध्यवि
शेषणेति॥तदर्थेश्रुतवत्॥इतिश्रीपदंकृत्यं॥केवलव्यतिरेकिपक्षतिग्यासराह॥प्रतीतान्वयेतिप्रती

तान्वयमात्रेण अर्थः ॥ प्रतीतान्वयेन साध्यं तस्य यत्साधनं तस्य वाचकत्वमित्यर्थः ॥ योयो धूमवानिति उदाहरणं ॥ इति व्याप्तिराह ॥ हेतुविभक्तिमदिति ॥ दृष्टविरोधव्यतिरेसाधारणलक्षणमाह ॥ येतदेवेति ॥ अर्थवादिति ॥ पक्षधर्मतायाश्च दर्शनमनुक्तमपि तेनैवोक्तं द्रष्टव्यं ॥ तथा चानुक्तमभिधानेऽर्थो नापादितमिति भावः ॥ केचित्त्वर्थवादाद्यर्थविरोधादित्यर्थः धूममात्रस्यैवव्याप्यत्वेनतत्संबंधस्यागृहीतत्वादुक्तमित्याचक्षते ॥ तन्न धूमवत्त्वस्याप्यव्याप्यत्वेनगमकत्वाभावात् ॥ सामानाधिकरण्यावच्छेदकदण्डसमावेदान्यतरत्वाघवस्यैवतद्धीजत्वात् ॥ नचैवं धूमवत्त्वादिरुक्तो भीतरमविनाभावनं ॥ यावतापक्षधर्मतार्थमनुमान मत्र प्रयोगः ॥ कृतकत्वं तु विपक्षे धूमवद्धेतुरिति कृतकत्वपरामर्शकरणासंभवादितिवाच्यं ॥ उदाहरणान्यत्वाभ्यामेवहेत्वपरिच्छेदात् ॥ नहि धूमवत्त्वेहेतौमत्र धूमइत्युदाहरणं धूमवांश्चाग्नेयमिति साध्यनयोर्युज्यतेकर्तुमत्र धूमवत्त्वहेतुमिति उदाहरणं धूमवत्त्वंचाग्नेयमित्युपनयइत्याहुः ॥ उत्पत्तौ तत्रवह्नेर्व्याप्यो धूमइत्युपनयस्यात् ॥ मत्वर्थाव्ययोगात् ॥ यदि चैकोभूकसंप्रदायानुरोधात् ॥ तत्रतमालदत्रयमित्युदाहरणं ॥ मेघप्रतिज्ञादावयमिति चिंत्यं ॥ सप्तमिखलादिति विरुद्धार्थकमीषदेवविभक्तेर्विभक्त्यंतरान्वयविरोधित्वात् ॥ अतएवप्रतिबंधकान्यस्यसतइत्यादिरविहतुरविकल्पइतिपरवः ॥ व्याप्तिरिति विशेषपक्षेनास्याः प्रथमेवस्थितत्वमाप्रथममाक्षेपविषयत्वादित्यर्थः ॥

पक्षधर्मतायाश्चवैशिष्ट्यरूपत्वेनान्यथासिद्धितिभावः॥केचित्तुसकलवादिसिद्धत्वमेवव्याप्तेः॥प्रायेणसपक्षधर्मता
पांडुपुत्रसविनेसादाकुक्षिद्वीपतिपद्यतेसाहु॥तत्वदर्शीवायेतिव्याप्तिर्यथादाहरणेनमदृश्यतेतथोक्तप्राकृत्वे
थकृदभिव्याप्यपदर्शितत्वेचपरंपरयादाहरणास्यदृश्यं॥पदार्थविधयावाक्यार्थविधयातत्तत्लाभात्॥किं
तुतेनसहचारबोधितमानसोमाग्निगृहेभवतीति॥तत्रेतिदृष्टांतनिरूपकीभूतेसतीत्यर्थः॥अत्रजनकांतक
मुदासानवोरणामन्यायजनकानपरं॥प्रतिज्ञादिवाक्यार्थबोधजनकेसंसे॥निरुक्तसंबंधबोधजनकत्वंचतद्बुध
तामर्यकत्वंउपनयेचपक्षधर्मतावोधनेतात्पर्यमितिनतत्रातिव्याप्तिः॥महानसंबंधविधायकत्वमित्यर्थः॥
उपनयस्यतत्संबंधानुवादकत्वमितिग्राह्यदं॥यावदवच्छेदनतत्संबंधकत्वंतावत्समुदायपर॥तेनोदाहरणो
क्तदृष्टांतेनातिव्याप्तिः॥सामान्यलक्षणादृष्टांतेव्याप्यत्वाभिमतत्वादित्यर्थः॥अन्यरसस्वरसेकस्यचिन्म
तमपाकरोतिन्यायेतिन्यायावयवेसतिदृष्टांतमतिपादकत्वमित्यर्थः॥उपनयेसतिलक्षणंनिगमनातिव्या
प्तिरपिद्रष्टव्यं॥अन्यद्रसस्वरसप्रदर्शनं॥तद्धीजंचतादृग्ज्ञातिज्ञासाजनकत्वमनुगतावच्छेदकस्यदुर्ग्रहंतस्य
वेचनदवलक्षणमितिद्रष्टव्यं॥अत्रव्यभिचारीति॥व्यभिचारिसाधारणसाध्यसामानाधिकरण्यमात्रप्रती
तिप्रसंगवारणायधीरित्याहरसिद्धर्थः॥तेनवीप्सितत्राष्टेनयावत्साधनाधिकरणोपस्थितौतत्रसाध्यव

त्वविधानाद्धावसाधनाश्रयाश्रितसाध्यसंबंधरूपाव्याप्तिग्रहेतरहेतुभावः। ग्रथ हृदमिमतव्याप्तिपक्षेविशिष्टसामान्य
धिकरण्यसामान्यस्यावश्यकत्वात्पदद्वयेनात्र। किंतयेतिचिंत्ये॥ नतुलक्षणेपिव्यभिचारीवारकायसा तत्प्राचतयाप्रकृत
साधनाधिकरणसाध्यवत्त्वबोधनाद्यभिचारस्तत्रनास्त्यसद्व्यवहारज्ञानात्। भवतिमानसोव्याप्तिग्रहइतिचेन्न। यदिदृ
ष्टांतादावप्यभिचारज्ञानेनविरोधिज्ञानोत्सादकत्वेनानुमानेतदाख्यपदद्वयेकस्यापिसंभवेनव्याप्तिग्रहस्यमान
सत्वोपपत्तेर्नविरोधात्॥ व्यभिचारज्ञानविरोधिज्ञानविषयस्यैवव्याप्तत्वोचितात्। यत्रेति॥ ननुसामानाधिकरण्यमा
त्रस्यव्यभिचारिसाधारणतयाकेवलान्वयिन्यपिविशिष्टसामानाधिकरण्यमेवावश्यंव्याप्तिरवेनाभ्युपेयं॥ तल्लाभश्च
मदिदीप्सादिनापिस्याद्धूमादावपिस्यात्॥ मदिच्छांविनानलाभः॥ तदाकेवलान्वयिन्यपिताद्विनानलाभइति
तत्रापूर्णादयैवसाध्यवतिसाधनस्यव्यभिचारसंभवति॥ ग्रत्रतुनेतिविशेषोक्तौतिवाच्यं। हेतुसमानाधिकरणाभावप्र
तियोगिसाध्यवतिसंशयस्यापिसंभवात्॥ नचकेवलान्वयिनेनज्ञातेतदसंभवइतितत्रैवनानुपादानमिष्टं॥
नान्यत्राप्रीतिवाच्यं॥ तदनभिज्ञंप्रतितदुपन्यासात्॥ प्रतिपाद्यस्यस्वतोज्ञानसंभवेपिन्यायप्रवृत्तावस्यैवहे
कृत्यंचेनत्रापितदुपादानस्यकर्तुमुचितत्वात्॥ ग्रन्यथाकेवलान्वयिनेनज्ञातेतस्यप्रमेयत्वादितिलिंगस्यपक्ष
धर्मत्वादिनोपादेयत्वेतथालेचकथकसंप्रदायविरोधात्॥ ग्रसाधकतोपयोगेचनियमतउभयवादिसमम

तिविषयकतयाकसंप्रदायसिद्धत्वाच्चव्याप्त्यपेनपन्यास॥ किंचयदिकेवलाचलेनतातेव्यभिचारशंकाविरहात
वीक्षानुपादानेतदाऽसहचारशंकायाअपितत्राभावात्॥सहचारबोधनप्रयोजनमपिनास्तीत्युदाहरणमात्रेन
येनयदिचसहचारज्ञानंविनाऽपिमनसोपिनव्याप्तिग्रहइतितद्बोधनायतदुपादानं॥तदाऽव्यभिचारज्ञानंविनाप्ति
ततोनव्याप्तिग्रहइति।नहिनिश्चितसामान्याधिकरण्यस्यापनायवीक्षाघटितमुदाहरणमावश्यकं॥एवंचाभेदानु
मानेपिवीक्षादेयंनचहेत्वधिकरणस्यैवकक्षीकृततत्रसंभवतीतिवाच्यं॥यथावस्थाभेदेनभानस्यपुरस्कारादे
कस्यपक्षत्वेदृष्टांतत्वेचनविरुद्धमितितथावीक्षाप्यनानुपपन्नेतितस्मात्रसमाधानेत्थंमितिवीक्षायामप्ये
व्यभिचारतोदवस्थ्यमिति।अनेकयत्तत्पदवैयर्थ्यसमर्थनायाऽपिवीक्षायाःसाधनाधिकरणाद्वित्यत्तत्पद
स्थापनपरिहारार्थत्वसंभवादधिकरणांतरेसाध्यवत्ताग्रहांतरेणव्याप्तिग्रहइत्यर्थः॥ननुवीक्षायांसत्यां
त्तिबलाद्व्याप्तिग्रहःस्यात्॥तथाहिवीक्षितत्राद्यग्रहणानंतरंद्वितीयश्चाद्यस्यानुवादकतयाप्रमाणमनुभितासा
यांसत्यांतिबलाद्व्याप्तिरासयेकत्वंगृहीतेव्याप्तिबोधस्यैवप्रयोजनतयाप्रथमप्रमोपस्थाप्यत्वेनैवसा
धनाधिकरणाकेदृष्टेदृष्टेनानुगतरूपेणोपस्थाप्यते।येवंचसर्वत्रसाधनाधिकरणेसाध्यवत्त्वबोधनाद्भव
तिव्याप्तिग्रहइतिचेत्।हंतर्हिसुसंस्कारेवीक्षांविनापियद्योगात्प्राथम्याच्चयाप्तिग्रहायैकत्वेनियमइति

युसस्तेनैवसर्वसिध्यादन्यत्र किं स्यात्॥ सकृदुच्चरितयसदादेवयावत्साधनाधिकरणोपस्थितौ वीप्सावद्
व्याप्तिग्रहसंभवेकिंगुरुणावीप्सादरणायद्योगप्राप्तयाप्योंयुसस्तेतरपुरुस्करणात्याक्षरेणोदारेणैवभवती
तिनवीप्सायुसस्यादरद्योतनार्थत्वं॥ नतुवीप्सायुसस्यादरे विमतिचारतादवस्थ्यमिसत्रतासमी॥तदिदमुक्तं
प्रद्योगप्राप्त्यप्याप्यमवव्याप्तौलब्धार्थावीप्सावधारणायुसार्थइतिवीप्सायाव्याप्तिलाभमभ्युपेत्याह
वीप्साचेति॥ यद्यपितसदवीप्सायामपिनानन्वयः॥तत्रापियसदद्वयोपस्थापितयोःप्रसक्तपदद्वयमनपराम
र्शंसंवाद्॥ यथानासद्विमानभूमुखीवभवेत्सत्रतथाप्येकपदोपस्थानादपिमतसिधिसंभवेद्वितीयतस्य
ह्यपादानेप्रयत्नगौरवमितिप्रियायेणतदुक्तमितिदृष्टव्यं॥ ब्रुवंतीति॥यत्पदद्वयात्पिन्नपिन्नरूपेणो
पस्थितयोरप्येकनभूमवत्तादिनारूपैणैकतसदनपरामर्शसंभवादित्यर्थः॥ अत्रवदंति॥ यिसवीप्सयो
रिहनेनसत्रेणवीप्सायोक्षुद्यतेयेकपदस्यस्थानेपदद्वयात्मकःसमुदायोविधीयतेवीप्साचतत्रयाक्ष्यं
समिच्छतीतिभ्रमःतदभिधेयस्यसाकल्यनाप्यपरेपरेयदार्थेनसंबंधः तथाचतत्समुदायेयेकपद
तामापन्नेबहुवृत्तिशक्तिपुरस्कारेणैवसमुदायसाकल्यनैवस्वप्रतिपाद्यमुपस्थापयतीतियुसत्तिरव
सीयते॥ अतयेवसमुदायस्यसकलस्वावयवाधीनोपस्थापकत्वे॥ येकपदंवपुरस्कृत्यतत्रबहूवचनापत्ति

दिति। वाच्ये॥ गौरवेणसमुदायस्यैकदेशेनानुपस्थापकत्वेनयमदृष्टसंबंधमेकंभिन्नमिन्नस्वरूपेणोपस्थापयत्वा
दनयेनावयवदृष्टवृत्तिर्व्याप्तिपूर्वकारोवेतवापिस्वीकारः॥ नचैवमप्याश्रयासिद्धिः। धूमवत्प्रदेशयुगपद्देशानेकत्व
रूपान्वितयकृत्स्नयापदेशेनोभयबोधजननात्॥ यथाचनावृत्तिस्तथात्वनेवक्ष्यते॥ अत्रभूकृतेव। अत्रयाधूम
वानिस्कंदहरणंतत्रोचितमितिवदंति॥ अत्रधूमोधूमोहतोनयुज्यतेनहिमत्पर्वतसमानाधिकरण्यप्रतिपा
द्यते॥ नधूमेसमानाधिकरण्यंप्रतिपाद्यतेधूमस्याधेयतायाःपर्वतस्याधारतमाश्रयतीतेःकिंतुधूमसंबंधस्या
धेयताप्रतीयते॥ तस्मान्नधूमस्तत्रवह्निरिस्यदहरणंतत्रोचितमितिवदंति। अत्रधूमः॥ मेवपर्वतोवह्निमान्नि
तिप्रतिपत्तावह्निव्याप्यधूमवाञ्छब्दप्रमितियुनयुक्तःतस्माद्वह्निमानितिभिगमनेचनस्थले। चन्द्रादेराधेयतायाः
पर्वतादेराधारतायाश्चतत्रप्रतीतेः॥ नचतत्रापिपर्वतेवह्निरियाद्येवप्रतिपत्तिरितिवाच्यं॥ कृत्स्नसंबंधावि
रोधात्॥ यदिचवह्न्यादिविशिष्टसंबंधाग्रहमतेप्रतीतोविशेषणोपस्थापकस्यवह्न्यादेराधेयतायाप्रतीयतमेवेति मन्य
सेतत्रापिसमानमितिदृष्टेति। येत्वत्रसंप्रदायमतेनसामेकदृष्टांतसंमोदाहरणाभिप्रायेणावादृष्टां
तत्वसाध्यादिवैधर्म्येणोदाहरणाभासत्वंबोध्यं॥ यद्यप्यभयवैधर्म्येणैसाध्यादिवैधर्म्यमस्त्यवस्थाप्यंस
तत्कोऽन्वयव्याप्तावनेनापिरूपेणोद्वहनमितिदिग्गुप्तन्यासइतिबोध्यं॥ अनुपदमिति। तियथामहानस

...रूपेवयत्रोदाहरणमित्यर्थः॥विपरीतेति॥योऽग्निमान्नूसधूमवत्वादिति यत्रोदाहरणमित्यर्थः॥येषमग्ने पिबत्रा
यपशोत्तरांशासत्वमस्तितत्रार्थनोक्तमितिचिंत्यं॥अनुमितीति॥अनुमितिकरणव्यापारसमानाकारज्ञानज
नकत्वयत्वमित्यर्थः॥यद्यपितस्मादितिनिगमनेतद्धेतुव्याप्तिपक्षधर्मतापरामर्शोदुक्तज्ञानजनकत्वंसे
ध्यतिं॥तथापिसाध्यव्याप्यविशेषणकपक्षविशेष्यकंपरामर्शसमानाकारकत्वज्ञानजनकत्वंनास्तीतिनातत्रा
तिप्रसंगइतिभावः॥ननुपरोक्षलिंगपरामर्शहेतुतोगीकारयेवनास्तिकुतस्तल्लाभोपनेयइत्यतआह॥त
दनन्यगमनेति॥तथाचोदाहरणानेतरंपक्षधर्मतामात्रस्याप्यदर्शनार्थमेवयत्वोत्तरंपरोक्षस्त्रीकार्यमेव
व्याप्तिविशिष्टपक्षधर्मतापदंकिंतत्तिमर्थकतेत्यमित्येववक्तव्यं॥तच्चतृतीयलिंगपरामर्शहेतुत्व
व्यवस्थापनादेवनिरस्तमितिभावः॥तच्चानुमितीति॥अत्रोदासीनव्यापारकरणत्वेनसाध्यधीविशेषणो
पस्थितिव्यासरूपव्यासस्यदिना॥साध्यधीजनकत्वंप्रतिज्ञायामिवनिगमनेषिसाध्यपरत्वलक्षणाया
मानपरत्वादितिभावः॥पर्यवसितिप्रतीतिरित्यर्थः॥अथर्मेवसानादितिसाकांक्षत्वादित्यर्थः॥अथेतिअभि
धानंव्याप्तिविशिष्टलिंगानुभवःअभिधेयंतथाहृतलिंगेआकांक्षाहिचतुर्थेवयत्वेहारमित्यत्रवाभिधा
नापर्यवसानाद्वाविश्वजिदायजेतेतिअत्रेवाभिधेयापर्यवसानाद्वातदुभयभावेचकर्मेत्यादित्यर्थः॥ननु

घटाभावज्ञानेसतिघटस्मरणंनभवतितत्तदभावज्ञानसाध्यमितिनियमोव्यभिचारःस्यादिति॥अत्रकेचिदबाधित
स्यदिज्ञानस्यानुमितिहेतुत्वेलाघवात्परामर्शस्यैवतद्विषयतयानुमितिहेतुत्ववाच्यं॥नतुतद्विषयज्ञानानंतरं गौरवा
त्॥नचपरामर्शविषयीभावेतयाबाधसम्भवतियक्तयोरतिधवेत्स्यात्॥नन्वसिद्धिर्भिन्नत्वंनवानयोर्नित्यसाक्षा
दनुमितिप्रतिबंधकत्वंस्यात्॥परामर्शविघटनद्वारैणैवप्रतिबंधकत्वसंभवात्॥तथाचापसिद्धांतः किंचबाध
स्यपक्षीयसाध्याभावेतयाज्ञानंसाध्यसाधनसंसर्गज्ञानेसाध्यज्ञाने हेतुरितिपर्यवसितं॥त
च्चासंगतेसिद्धसाधनप्रसंगात्॥यदिचसाध्याभावप्रमाबाधःतदाखंडपरामर्शस्यसाध्याभावप्रमाविरहरूपो
बाधाभावः॥साध्यसत्वनिश्चयेविनानिश्चेतुमशक्यमेव॥तथाचतत्रापिबाधितत्वनिश्चयेपिसाध्यनिश्चयो
पेक्षणीयइतिअबाधितत्वनिश्चयस्यानुमितिहेतुत्वपक्षगोचरसाध्यसत्वनिश्चयसाध्यानुमितिहेतुत्वमापद्य
तेतिमहदसमंजसं॥तस्माद्यत्रागमेसतियन्नभवति॥तत्तदभावज्ञानेसतिभवतीतिपरस्यबाधोदिशा
नमप्रतिबंधेपिप्रामाण्याबाधितत्वादिकंबाध्यते॥नतुतज्ज्ञानमप्यनुमितिहेतुरसिद्धिप्रामाण्यादित्याहुः॥वस्तु
तस्त्वनुमितावनुपनीतागृहीतज्ञानवत्॥संज्ञासाधारणमबाधितत्वंज्ञानहेतुरित्यग्रेवक्ष्यते॥तथाच
हेत्वसिद्धिप्रामाण्यंबाधितत्वंधर्मितिमंतव्यं॥असिद्धिर्लक्षणमन्यथैववक्ष्यामः॥ननुनिगमनेनाप्यबाधितत्वा

दिशेषनसिद्धस्यप्रतिपादनमुखेनविरोधिन्यवच्छेदकतयाकार्ये॥ अन्यथाप्रतिनियमादयितुंशक्यत्वात्॥ तत्रचप्रागु
क्तोन्वयइतिभावः॥ यद्यपिहेत्वनाकांक्षितत्वलक्षणासिद्धस्यानन्यथासिद्धस्यापिनसाक्षात्बाधादिविरहेणाध्यक्षं
तथाप्यनिगमनस्यसर्वथैवसाक्षात्तदबोधकत्वेनतथाप्यसाध्यपुनर्वचनस्यानुवादतयाप्रयोजनत्वेनासामर्थ्यापरिहा
रात्बाधादिविधुनर्नमनयोजनमित्यसंगतंतथैवश्रुतेः॥ तदाहउपसंहारस्येषमदिमायहियरीतश्चेत्कावि
लयनेनामेतिसिद्धेतिसिद्धंपक्षादितथाचवह्निव्याप्यवानयमित्यत्रमथादमुख्येनसिद्धस्यपक्षस्यपरामर्शस्त
थासाध्यंडास्यापिसर्वनामत्वात्पुरामर्शीमुक्तइत्यर्थः॥ विरोधिनाप्रमेति॥ पक्षसाध्यसाधारण्यस्यसाध्याभावव्याप्य
त्वंचविरोधिनानिरासमेवार्थः॥ तथेतिवाक्यशेषस्यमतमेवदर्शयेत्प्रियस्यमवादितिभावः॥ प्रकरणविशेषेबाध
मेवोपन्यस्यतथाचायमिहाकारइतिमतमाश्रित्याह॥ बाधइति॥ हेतुमानित्यर्थइति॥ इदमस्थंसन्निहितत
थाशब्देतरापस्थितस्यहेतुमतयेवतथेत्यत्रतच्छब्देनपरामर्शसंभवादितिभावः॥ सामान्येनेति॥ यत्सामान्यधूमवान्स
न्नित्यनिस्तदाहरणस्थपक्षसाधारणसाध्यवत्परवह्निमदादिपरावस्थितस्यतत्सदनपरामर्शसंभवात्॥ पक्ष
वृत्तिपरामर्शःपक्षमात्रेणान्वयइत्यर्थः॥ यद्यपिपक्षेवृत्तिवह्निमत्त्वादिप्रकारकंयत्पक्षेनानन्वितंतथापित
यदानेवंतदातथेतिनत्वनेनावगतंतदातथेत्यनिदमुक्तंभवति॥ अतएवेति॥ नमदस्य

दृष्टान्तयोस्तत्रातिव्याप्तापत्तेः॥ यथोक्तेतत्रानुपसंहारेऽपि तत्रव्यभिचारानुमितावनुमित्यप्रतिबंधात्॥ नन्व
व्यभिचारादेवधर्मेतिव्याप्तिः॥ नचेहत्वाभिमतत्वेसतीतिशरीयमितिवाच्यं॥ हेत्वाभिमानादेवकादाचित्को वातक्ता
लीनोवाऽत्रव्यभिचारादावप्यकृत्रचित्तत्सत्वेतिव्याप्त्यपरिहारः॥ अंशेसाधारणानैकांतिकादावनभिमानरूप
मामव्याप्तिः॥ किंचयथाधर्मेयदनवच्छिन्नव्यभिचारितत्वादिदंमविषयीभूतधूमादावतिव्याप्तिवारणायसम्हालंबन
भूतैकदेशाप्तविषयकृतादृशज्ञानविषयत्वंयत्रसंशयतावतिव्याप्तिस्तदवस्थैव॥ नचतादृशज्ञानंयदिधर्मानुमिति
प्रतिबंधकत्वंतदेवविषयतदनविवक्षितमितिवाच्यंबाधितस्यलिंगस्यासम्यग्हापत्तेः॥ बाधज्ञानस्यपक्षैकदेसाधा
भावविषयतयातद्ज्ञानप्रमात्वविषयतयावाप्रतिबंधकत्वंनलिंगविषमतयाऽप्रतिबंधकत्वात्॥ नन्वाधामाम
पक्षधर्मोहेतुरनैकांतिकोवेतिनिर्णयात्॥ तत्रव्यभिचारित्वेनवाकृतलक्षणगमनंस्यादितिचेन्न॥ बाधितत्वेनरूपे
णविभागानुपपत्तेः॥ नह्यन्यनरूपणासामान्यलक्षणंरूपांतरणाविभागःसंभवति॥ तथाचिरूपमाणासकीर्णाव्
धस्थलेऽभयप्रतिबंधकत्वंस्यात्॥ नह्यत्रवतत्रापिव्यभिचारित्वंसंभवः॥ अपिचासिद्धादिसंकीर्णसत्प्रतिपक्षतेन
रूपालक्षणागमनेपिसंशयोतदव्याप्तिः॥ नचचविरुद्धाभयव्याप्यगोचरसम्हालंबनस्यप्रतिबंधकत्वान्॥ त
स्यचैवमसंशयमात्॥ नचसंशयोस्वगोचरपरामर्शोत्थप्रमात्वनियमात्॥ तस्मात्रैरूप्यंवोक्तलक्षणगमनंस्या

रितिवाच्यं॥ज्ञानेन्द्रियावद्विषयतापप्रतिबंधकत्वेतावतिमाध्यंखिवक्षिते नचाऽऽद्येऽपरहेतुविषयतापिस
धेतुगोचरपरामर्शस्योनुमितिप्रतिबंधकतयातदंशेवायथार्थेनियमेनोक्तदोषापरिहारः अक्षवद्विषयेपिचारिष्टादि
क्षमविषयीभूतधूमादावतिव्याप्तिस्तदवस्थैवधूमांशेतत्रापियथार्थत्वात्॥नचतत्रधूमविषयतापप्रतिबंधकत्वेम
नाभावइतिवाच्यं॥किंचिद्दुर्निरूपत्वेपिचारीतिज्ञानेपिनुमितिप्रतिबंधाभावात्॥धूमविषयत्वेनैवतत्रप्रतिबंधकत्वा
त्॥नचसंशेतुपरामर्शस्यैवापरहेतुविषतापप्रतिबंधकत्वेमानाभावः॥तद्विषयेतस्यानुमितिजनकत्वेनतद्विष
यत्वेनैवप्रतिबंधकत्वात्॥ननुसत्प्रतिपक्षयोर्विरुद्धयोरन्यतरस्मिन्ज्ञातेयत्पक्षधर्मतान्यतरभंगज्ञानंतस्यप्रा
र्थ्यतेतत्प्रतिबंधकतयातत्रनाव्याप्तिरितिचेन्न॥तादृशज्ञानेनैवप्रत्यूहेपिकिंतुविरुद्धोभयव्याप्यसंभवमेकत्र
नवर्ततदितिमास्यवधारणादनुमितिस्तेनतद्ग्राह्यं॥तथायत्रविरुद्धद्वयपरामर्शोनैतरंविनुमानरसंचारादिनाव्याप्ति
पक्षधर्मतान्यतरभंगानुमितिजनकोव्याप्त्यादिपरामर्शोनजातस्तत्रसत्प्रतिपक्षेऽव्याप्तिस्तदवस्थैव॥नचतादृ
शज्ञानाभावेनतत्रानुमित्यप्रतिबंधात्संशयादयमेवनेतिवाच्यं॥विरुद्धोभयव्याप्यपरामर्शस्यैवविरोधिसामग्री
त्वेनप्रतिबंधकत्वान्नहिव्याप्यद्वयतत्पक्षधर्मतान्यतरभंगज्ञानप्रतिबंधकत्वपुरस्कारेपातस्यहेत्वाभासत्वंकिंतुकदाचित्सामग्री
वैगुण्येनतदन्यतरभंगज्ञानंतत्रभवतीति॥अन्यथातत्रापिकरणविघटकत्वापत्तौबाधप्रतिरोधयोःसाङ्कादनु

मितिप्रतिबंधकत्वमितिसिद्धांतेत्याह येत॥ किंचयत्राविरुद्धंसमीचीनलिंगद्वयंविरोधभ्रमेणसत्प्रतिपक्षितं॥
तत्रतज्ज्ञानस्याप्ययथार्थत्वेनियमेनाव्याप्तिर्ध्रुवेत्वेषामितिनेव॥यत्तुसंप्रतिपक्षसाधकासाधकावितिज्ञानंसत्व
तिपक्षेऽनुमितिप्रतिबंधकंतच्चयथार्थमेवेतिनाव्याप्तिः॥अन्यथाऽसाधकत्वानुमितिवैयर्थ्यापत्तेरितित॥त
त्तुच्छं॥साध्यासाधकत्वंहिसाध्यसिद्धिजनकत्वंतदनुमितिप्रतिबंधकतावच्छेदकरूपवत्तावज्ज्ञानेचनसाक्षाद
नुमितिप्रतिबंधकंबाधवदनुमितिविषयविरोधिनवगाहित्वान्नाधिकरणादिघटकंव्यभिचारादिज्ञानवत्॥परा
मर्शविषयाप्तावान वगाहित्वात्॥अन्यथाऽसाधकत्वस्यव्यभिचारादिवद्ध्रुवाप्तासंतत्रतायत्तेः॥असाधकता
नुमानेचनानुमितिप्रतिबंधायैवंतुतदप्यदुष्टमितिअत्रस्फुटमिति॥ किंचानुमितिप्रतिबंधकंयथार्थज्ञा
नविषयत्वेविशेषणमुपलक्षणंवानाद्यः॥अज्ञायमाननिश्चयदोषविरुद्धादावतिव्याप्तिप्रसंगात्॥नचतदातद
संग्राह्यमेवेतिवाच्ये॥साध्यव्यापकाभावप्रतियोगित्वादेविशेषलक्षणेतदोषसत्वेनसंग्राह्यत्वादन्यथाविशेष
लक्षणान्नातदातिव्यापकत्वापत्तेःनापिद्वितीयः॥संशयतावत्साधारणासद्धीतिपक्षेचविशेषदर्शीनदशायांतद्
ज्ञानविषयत्वात्॥तद्दर्शनदशायामपिहेत्वाभासत्वापत्तेः॥अपेक्षयाहुर्यतोदृज्ञानविषयत्वंयस्यतस्यत
प्रतिहेत्वाभासत्वंप्रसंज्यंप्रसज्यप्रतिषेधवाक्यद्वयेनपुरुषगविरुद्धत्वादिविशेषानुद्धीतस्तस्यतंप्रतिहेत्वाभासत्वा

नापत्तेः॥ द्वितीयेतुविशेषादर्शनादर्शनदृशा यामेकपुरुषंप्रति कृतकत्वादिहेतोर्हेत्वाभासत्वेविशेषदर्शन
वतःपुरुषांतरस्यापितथात्वापत्तेरिति॥ अत्रोच्यते॥अनुमितिप्रतिबंधकयदज्ञानस्यानुमितिप्रतिबं
धकतावच्छेदकःसंशयविपर्ययउपाधयोवक्ष्यंतेताः॥अनुमितिप्रतिबंधकतावच्छेदकंचेत्तुलिंगान्यत्वस
स्यानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वमेवविवक्षितं॥तद्धेत्वगोचरयथार्थज्ञानविषयत्वंहेत्वाभासत्वमि
त्यर्थः॥विषयत्वंचविशेष्यतेऽत्रतन्नसंशयविपर्ययोपाधयइतिशब्दः॥तद्धेत्वगोचरत्वंचतात्कालिकतद्धेत्वगोचरत्वं
तथाचपक्षरूपत्वेसाध्यमितिधीयथार्थस्ववृत्तिकादाचित्कसंबंधपुरुषकारणसत्प्रतिपक्षितत्वबुद्धिर्यथार्थवेनसत्प्र
तिपक्षितान्यतरसंशयेतोनातिव्याप्तिः॥नचैवंयथार्थपदवैयर्थ्यं॥तद्वृत्तिविरहव्यधिकरणसंशयेतावन्नतिव्याप्तिसंगइतिवाच्यं॥तद्धे
ह्वनविषयविशेषणं॥किंतुज्ञानविशेषणंतथाचेदानींवह्निमत्त्वेधूमवत्त्वेचनिश्चितेधूमइतित्वमनुमितिप्रसंगतादवस्था
त्यं॥तादृशज्ञानविशेष्यत्वंचविशेषणमेव॥नचज्ञानमात्रतादृशंनिश्चयंगृह्णातिरितिवाच्यं॥तत्रेश्वरज्ञानस्यव
दानींतद्ग्रहरूपलिंगमिसाकारस्यतदाप्यसत्त्वात्॥नचैवंपुरुषीयसत्प्रतिपक्षतादृशंकृतकत्वादिहेतावपुरुषांत
रंप्रतिसत्प्रतिपक्षतापत्तिः॥आपादकाभावात्॥नहितादृशज्ञानविषयःसर्वेपुरुषंप्रतिहेत्वाभासइतिलक्षणा
र्थः॥किंतुतादृशज्ञानविषयोहेत्वाभासइत्येतावतैवहेतुतेदाभासविवेकोपपत्तेः॥तद्धुरुषीयसत्प्रतिपक्षतायाः

नसुखीयसमानवलोपस्थितसप्रतिबध्यतनुखीयानुमितिरूपकार्यलिंगालेमयोजकमितिनतदाप्तिः।येषांसधू
तावत्साधारणेपिसामान्यतइष्टापत्तेःविशिष्टापादकाभावात्॥नचसमूहालंबनोहस्तैकत्वैकभासविषयतादृ
ग्ज्ञानविशेष्येऽनन्वयसंशयतावतिव्याप्तिः।तदंशेतत्प्रकारकयथार्थज्ञानविशेष्यत्वस्यविवक्षितत्वात्।बाधित
मितिज्ञानस्यभावीयेविशेष्यत्वात्।बाधितलिंगेनाव्याप्तिः॥नचतथापिसंशयेतिपक्षितव्याप्तिरवृ
त्तानाभावादितिवाच्यं॥इदंलिंगममनेनसंशयेतिपक्षेपासंशयेतिपक्षितमितिविशिष्टज्ञानस्ययथार्थत्वेनसक
लसिध्यत्तानसंबंधस्यस्वरूपसंबंधविशेष्यस्यवाक्यजन्यत्वात्॥तत्संबंधेनज्ञानस्यापियथार्थत्वाच्च॥अतय
वत्संबंधस्यानिश्चयादोषत्वंनचेवंधूमवह्नियप्तिचारीतिज्ञानस्यसंबंधमादायधूमेयप्तिचा
रिणसाध्वीअनियप्तिरप्यादितिवाच्यं॥तज्ज्ञानस्यायथार्थत्वेनसकलसिध्यत्तामात्रत्वसंबंधस्याकल्पन
त्॥अत्रयानन्यगत्यातत्कल्पनात्॥नचसंबंधोहतज्ज्ञानस्यैवानुमितिप्रतिबंधकतयातद्गोचरज्ञानस्यानु
मितिप्रतिबंधकत्वमितिवाच्यमिष्टापत्तेः॥नन्वनुमितिप्रतिबंधकीभूतादृग्ज्ञानविशेष्यत्वंलक्षणार्थः॥
अपितुतादृग्ज्ञानविशेष्यत्वमात्रंतज्ज्ञानेव्यभिचारिवह्निगोचरमनुमितिप्रतिबंधकमयीसन्यदेतत्॥अन्यथा

बाधितेऽप्यनुमाप्रवृत्तेः॥ नहि लिंगविशेषणं बाधितत्वं ज्ञानस्यानुमितिप्रतिबंधकत्वे किंतु बाधमात्रविषयस्येवतद्दृष
यतयाविशेष्यमाणादिसत्वं॥ अत्रचयत्किंचित्संबंधेनतद्वत्तागोचरयथार्थज्ञानविशेष्यत्वमितिप्रसक्तं॥ तत्तस्सं
बंधनयथार्थमनुगतमितिचिंत्यं॥ ननुयथार्थत्वस्यविषयघटितत्वाद्विषयविशेषणीकरणमपितद्बलब्ध
मेवतथाचाव्यर्थविशेषणमिस्यपिनोवाच्यं तद्बलस्यलक्षणेप्रवेशात्॥ यद्दृष्यत्वेनेतिज्ञायमानमितिच॥ तत्रा
पिज्ञानविषयीभूतस्यप्रमाचारादेर्नप्रतिबंधकत्वंबस्तुतोज्ञानस्यैवस्वरूपोपयोगितयाद्वितीयलक्षणंसमीचीनमिति
मंतव्यं॥ अनेनव्यभिचारादिदोषाभावोपलक्षितोयोदृष्यत्वेनैवलिंगज्ञानस्यानुमितिप्रतिबंधकत्वं॥ अनेनच
लक्षणाद्दमेतत्समित्यत्रतच्छब्दस्यतद्वत्तयैवतद्वमिस्यर्थः॥ तेनव्यभिचारादौधर्मेनातिव्याप्तिः॥ धर्मिणिचलिंगे
नासंभवः॥ नचपक्षतावच्छेदकरूपायाअज्ञानरूपायाअसिद्धेर्नसंग्रहइतिवाच्यं॥ इष्टापत्तेः॥ प्रामाण्यदोषस्यैवा
त्रहेतुत्वाभावात्तेनलक्षणाच्यालं॥ नचज्ञानादिदोषाज्ञप्यमानेकारणाभावेनस्वरूपसत्त्वेनैवप्रतिबंधकत्वात्॥ नचै
वंसद्धिरित्यादिकथायांनाद्भवनीयं॥ अप्रामाण्यादेस्तत्राऽहेतुत्वाभावात्॥ निग्रहस्थानानेरस्वाभावाच्चे
तिवक्तव्यं॥ हेत्वाभासाश्चयथोक्तादितिसूत्रेऽनुक्तसमुच्चयार्थेनचकारेणातस्यापिनिग्रहस्थानत्वप्रतिपा
दनात्॥ सिद्धसाधनस्यचपक्षतावि॰रहरूपंवसंनस्यार्थांतरत्वेनवाद्भवनमितिसर्वमवदातं॥ नचैतल्लक्षणं

धापत्तेरिष्टत्वादिति॥ननु गौरवज्ञानस्यार्थापत्त्यनुमितिप्रतिबंधकत्वात्॥गौरवस्यव्यभिचारादरवेहत्वाभावस्य
नचेहत्वविषयतयाज्ञानस्यानुमितिप्रतिबंधकत्वान्नतन्मात्रेमितिवाच्यं॥बाधस्याप्यतन्त्रापत्तेः॥नहिज्ञानम
पिहेत्वविषयतयाप्रतिबंधकमिष्टमितिचेन्न॥येनज्ञानेनसंयोगेनाग्निमनुमितिप्रतिबंधः॥तस्यैवसंयोगाभावेनाग्निमतस्त
नचगौरवं॥तथाफलमुखगौरवादेः प्रमाणसिद्धयतयातज्ज्ञानस्यप्रतिबंधकत्वादिति॥तेचयेचभिरुपाधिभिर्विभ
ज्यंतइत्याह॥तेचेति॥सव्यभिचारणीति॥यद्यपिसामान्यलक्षणानंतरं विभागायुक्तः॥अन्यथाअप्रामाण्यकालतापत्तेः
तथाप्यनुपसंहारीनसव्यभिचारात्तर्हितः किंतुअसिद्धेतर्हेतदिति वक्तव्यमितेतथाचतत्साधारण्यनसव्यभिचा
रलक्षणमुक्तमितिमपनेतुंतदंतरंतत्प्रदर्शनपरत्वमेवतस्यनविभागोतासर्थमितिभावः॥प्रसंजकत्वमेव
साधकत्वमापादकत्वंवाच्यं॥तच्चविरुद्धाव्यभिचारिणोसंभवतीत्याह येकस्येति॥नाप्युभयपक्षसाध्यवत्त्वं॥सा
ध्याभावस्यदृष्टांतेअनुपसंहारिणिपक्षेसंवेतथतिभावः॥ऊर्ध्वमिति॥अत्रसर्वेतिविशेषणंतेनधूमादेर्नातिव्या
प्तिः॥अथेतिसाध्यसंदेहजनकोटिद्वयोपस्थितिःसाधनाभावोपस्थितिःतज्जन्यंयत्पक्षधर्मतासंबंधज्ञानंतद्वि
षयेसतीत्यर्थः॥ननुपक्षधर्मेतिव्यर्थमितिचेन्न॥साध्यसंदेहजनकसामान्यसंशयान्मैकोटिद्वयोपस्थिति
जनकज्ञानविषयीभूतंज्ञानंचेतिव्याप्तिवारकत्वात्॥पक्षधर्मता ज्ञानेचसाध्यसंशयविषयवृत्तितज्ज्ञानेनच

ज्ञानत्वस्यसाध्यसंशयविषयपर्वतादिवृत्तिज्ञानेप्रामाण्यसंशयात्मककोटिद्वयोपस्थापकंकिंतुज्ञानवृत्तिताप्रा
नमेवेतिभवतितद्ध्यासः ननुसर्वत्रानेनविषयेज्ञानत्वादिनानुमितिप्रामाण्यसंशयजनकज्ञानविषयेज्ञानत्वे
नथाप्यतिव्याप्तिरतेत्रसंशयविषयीभूतज्ञानवृत्तिताज्ञानत्वेनैवभासात्॥इतिचेन्न॥नहितज्ज्ञानस्यनिर्विषयं
वक्ष्यमाणसाध्यसंशययेविषयपक्षवृत्तितज्ज्ञानत्वेनप्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकत्वंकिंतुप्रामाण्यसं
शयविषयीभूतनिर्विषयकानुमितिवृत्तिताज्ञानत्वेनैवजन्यथाघटादिज्ञानेप्रामाण्यसंशयोनस्यात्॥ज्ञानत्वस्यच
तादृशवृत्तिताज्ञानविरहात्॥ननुव्यभिचारिसंशयादित्वेनविषयीभूतसंशयेतावतिव्याप्तिः॥मैवंहत्वभिमतपदेनहेत्वाभा
सपरेणतद्ध्यासः॥अपक्षधर्मेधूमेतादृशत्वेनविषमेतथात्वेतिव्याप्तेः॥नचतादृशकोटिद्वयस्थापकंस्थापकंप्रमा
विषयत्वेनेयंनातिप्रसंगः॥हेत्वभिमतपदवैय्यर्थ्योपपत्तेः॥निर्विषयत्वादौसाध्यज्ञानत्वस्यविरुद्धत्वेनलक्ष्यत्वात्॥
तद्धावेनस्वानभिमतत्वात्सविषयत्वादौसाध्यंअस्यविरुद्धतेतिचेन्न॥ननुचसाध्यतस्यसंशयत्वेनसाध्या
व्यापदनवारणात्॥नचेष्टापत्तिःज्ञानजन्यत्वादौसाध्यतासिद्धेनवहेतावतिव्याप्तिः॥तस्यतत्रेसंशयंहिस्यात्॥
अतादृशसाध्यस्यानभावात्॥तस्माद्यदिविशिष्टस्यासंशयःहेतेतदानुमितिचारित्वत्वंविषयीभूतविरुद्धतेत्यर्थः॥
यद्धिचनस्यसंभाह्यतेतत्रापक्षधर्मतायदवैय्यर्थ्यमेवेतिचेत्॥वयंतुब्रूमः॥ज्ञानपदंप्रमापरंयद्विषयत्वेनकोह्य

पस्थापवक्षेतदंशेप्रमात्वेबोध्ये॥तेनस्वरूपासिद्धसंकीर्णेत्याव्याप्तिः॥विरुद्धंचासंग्राह्यमेवेतिपक्षधर्मतापदेसा
र्थकं॥तादृशज्ञानदशायामेवाचमतेलक्ष्यत्वमितिनदशावदग्रायोगव्याप्तिः॥नचेहापिमतयदवैय्यर्थ्ये॥तस्यसा
ध्याव्याप्यत्वपरस्यसंशेसाधारणेअतिव्याप्तिवारकत्वात्॥केवलान्वयीत्यादिनाग्रिमग्रंथेनतस्याचाक्षुष्यत्वप्र
तिपादनेदिति॥ननुसंशेतावसाधारणोसाध्यव्याप्यत्वस्याभावादतिव्याप्तिः॥केवलान्वयिसाध्यकेतनुपसंहारेवि
रिष्टस्याभावादव्याप्तिः॥इत्यतआहकेवलेति॥विरोधलक्षणस्यतद्ग्राहकत्वेवबोध्यत्वादितिभावः॥यद्यप्यस्य
संशोदूषणमेवदोषः॥तथालक्षणवारणायविरोधोपादानव्यर्थं॥तथापिसंशेतुनैकदापिहेत्वाभासइतिमतमालेत्
द्योतनं॥अतइति॥अतइतिपूर्वदोषोनवक्तव्यदोषइत्यर्थः॥अत्रेदंचिंत्यं॥पक्षेसाध्याभावस्यबाधवत्साध्याभा
वव्याप्यस्यसत्प्रतिपक्षस्यापिनिरस्तदोषत्वमेवतत्रदानस्यानुमितिप्रतिबंधकत्वात्॥न॥साध्यव्याप्यपरामर्श
स्याभावदशायांनथाहुमितिरिवात्रै॥बोधस्याप्यतथात्वापत्तेः॥मदिचयरामर्शकाले तत्प्रतिबंधकत्वकल्पना
दपेक्षितथात्वेतदातुल्यमेवचक्षुश्चिह्नमालूक्षिद्धूमः॥प्रतिबंधकः॥बाधवदेवेदंबाधयेमितिप्रमयत्वेनेति
अयंघटःयेतद्दृष्टाभिन्नः॥प्रमेयत्वादित्यत्रेवार्थः॥तयोरितिसाध्यनवगतसहचारदर्शनलक्षणानुसारेणेत
दुक्तंबोध्ये॥साध्यवदवृत्तित्वेन॥निश्चितसाध्यवदवृत्तित्वेनेत्यर्थः॥पक्षसाध्यस्यसंदिग्धत्वादितिभावः॥य

स्यपक्षतादृग्ज्ञानविषयत्वेनस्यतदाभिचारित्वमितिमतानुसारेणोक्तत्वोधे॥अन्यथादृग्ज्ञानविशेषणस्यापि
तादृग्ज्ञानविषयतयापक्षेऽग्नावपिकृतेनातिव्याप्तिप्रसंगात्॥तथाचतस्यादृग्ज्ञानस्यापिसंभवोद्यत्वमितिभावः॥
येतदज्ञानेपीति।नचसाधारणत्वादेवज्ञानेयंतदज्ञानस्याप्यनुमितिप्रतिबंधकत्वादितिवाच्यं॥येत
दज्ञानस्यविरोध्यविषयत्वेनाप्रतिबंधकत्वात्॥अतएवहृद्यानासत्वज्ञानमपिनानुमितिप्रतिबंधकं॥विरोधिविष
यसंसर्गकृतज्ञानस्यव्याप्तिग्रहादिकंप्रतिहंदूषादेनतस्यैवप्रतिबंधकत्वमितिभावः॥येतेनपक्षवृत्तित्वेसतीति॥
अत्रचविरुद्धान्यत्वमपिविशेषणंतथाच॥विरुद्धान्यस्यपक्षवृत्तेर्यानुमितिर्विरोधिअनुमितिपरंपराधीकरणा
विघटकवृत्तिमायत्॥तेनसाधारणत्वादिकंलक्ष्यते।तत्संबंधाग्रहवत्तिःविद्यमानतत्संबंधवत्वमित्यर्थः॥ये
तेनस्वरूपासिद्धसंकीर्णव्यभिचारिण्यव्याप्तिः॥विरुद्धेचातिव्याप्तिः।विरुद्धान्यत्वविशेषणेविरुद्धसंकीर्णसाध
रणाव्याप्तिःबाधितत्वसत्प्रतिपक्षितत्वमारभ्यानुमितिविरोधित्वात्॥बाधसत्प्रतिपक्षभारतिव्याप्तिकादाचित्कसं
बंधमादायासाधारणसंकीर्णसंप्रतावतिव्याप्तिः॥इत्येतानिदूषणानिनिरस्तानिवेदितव्यानि।स्वरूपासिद्धसं
कीर्णेपिसाधारणत्वादेःतादृग्ज्ञानेसंभवादन्यथालक्ष्यत्वादिरुध्यान्यस्यपिविशेषणादिरुध्नेनातिव्याप्तिः॥वि
रुध्यान्यस्यपक्षवृत्तेरनुमितिविरोधिसपक्षव्यावृत्तत्वं॥तस्यविरुध्नसंकीर्णसाधारणेपिसंभवान्नाव्याप्तिःबा

धित्वसत्त्वतिपक्षितत्वसाधनानुमितिपरंपराविरोधित्वात्॥नातिव्याप्तिः॥अव्याहृत्तिपदमहिम्नासंबंधस्यविद्य
मानत्वेनाभावात्॥सहेतावसाधारणोक्तौनातिव्याप्तिवारणात्॥ननुव्यर्थंविशेषणंनीलधूमादौविरुद्धान्यथे
२ पक्षवृत्तेरनुमितिविरोधित्वाप्यसिद्धत्वेनसंबंधस्यतत्रविद्यमानत्वात्॥अतिव्याप्तिरितिचेन्न॥व्यर्थवि
शेषणत्वस्यस्वरूपविशेषणत्वेनसार्थक्यात्॥अनुमितिविरोधित्वेचानुमितिप्रतिबंधकज्ञानविषयता
वच्छेदकसंबंधतोनाव्याप्तमानरूपासिद्धादावतिप्रसंगइति।विरुद्धादीति।नचैवंविरुद्धान्यथेति विशे
षणव्यर्थमितिवाच्यं॥अनेनरूपेणसाध्याभिधानात्॥उक्तरूपत्वमात्रंतत्रवर्तयेवविरुद्धस्यलक्षणात्॥तथा
चेपक्षविपक्षव्याहृत्तसाध्यदेशामात्रवृत्तिविरुद्धस्याद्यापाधारणेनसंग्राह्यत्वात्॥ननुविरुद्धत्वेननिश्चयदशा
यामुक्तरूपत्वमाभावात्॥तथाचतद्वारावर्तनायसार्थकमेवतदिति॥साध्याव्यापत्वसतीति।साध्यव्याप्यत्व
साध्याभावव्याप्यत्वोभयनिश्चयविरोधिहेत्वाभासतापाधिमत्वंसाध्यवन्मात्रवृत्तिस्वनिश्चयसाध्याभा
ववन्मात्रवृत्तिस्वनिश्चयविरोधिहेत्वाभासतापाधिमत्वंचेसर्वं॥तेनसैनसाधनेविरुद्धसंकीर्णसाधारणा
रव्याप्तिः॥प्रेथममितिसव्यभिचारिसाद्यग्रहंविनाहेत्वाभासत्वाग्रहादित्यर्थः॥यद्यपितदग्रहेपित्रादिना
हेत्वाभासत्वेगृहीतेनुग्रस्यत्वयवतथापिनसावैचिकहेतुः॥यथाश्रुतसाधनावसाधारणेअव्याप्तिरिति।म

१०२

ध्यतदभावनिश्चयेसंशयः॥पक्षेसाध्येपक्षवृत्तित्वसंशयश्चभवतीतिभावः॥अथायमिच्छावान्कृत्यादिमत्त्व
प्रामाण्याप्रामाण्यरूपोभयकोट्युपस्थितिजनकतावच्छेदकज्ञानत्वंतिसंशयेतौ ज्ञानेतिव्याप्तिरितिचेन्न॥तिं
गनिष्ठतया॥यत्तुज्ञानमुभयकोट्युपस्थितिजन्यंतदुक्तस्यतादृशावच्छेदकरूपवत्त्वनविवक्षितत्वात्॥ज्ञानेचेतु
प्रामाण्यमिसंशयोनुमितिवृत्तित्वेनैवज्ञाते॥तथापर्वतोवह्निमान्धूमवत्त्वादित्यनुमितिवृत्तित्वेनैवज्ञात
स्यज्ञानस्यवह्नितदभावसंशयजनकप्रामाण्याप्रामाण्यसंशयाभ्यामेकोभयकोट्युपस्थापस्थापकत्वात्॥अन्य
थाधूमेनमवृत्तितयाज्ञानस्यतथात्वेनस्यादितिमाप्रामाण्यविशेषणंसाध्यतदभावकोट्युपस्थाप्यतावच्छे
दकरूपवत्त्वात्तस्येति॥अतोनज्ञानेतिव्याप्तिः॥विरुद्धान्यपक्षवृत्तित्वसंशयादिदुष्टपक्षलक्षणेव्याप्ताननेव्या
ख्यातमितिबोध्यं॥लक्षणानुरोधनेतु॥यद्विषयेनज्ञानस्यानुमितिप्रतिबंधकसंशयस्तल्लक्षणानुरोधेनसाध्यं
साध्यवन्मात्रेति॥नूनुसंशेतुसंकीर्णोविरुद्धसंकीर्णोचासाधारणोऽव्याप्तिः॥प्रथमस्यसाध्यवन्मात्रवृत्तित्वात्॥
द्वितीयस्यसाध्यवन्मात्रभाववन्मात्रवृत्तित्वात्॥नचसाध्यवत्पदेनिश्चितसाध्यवत्त्वं॥साध्यभाववत्पदेचनिश्चित
साध्यकत्वंतत्परभक्तुपसंहर्तव्यंस्यात्॥संशेतुतादृशोयंधूमेनिश्चिन्॥प्रथमेनिश्चितसाध्यवत्ताभसिद्धेः॥प्र
मेयमात्रस्यपक्षत्वेनसंदिग्धसाध्यकत्वं॥द्वितीयेऽनिश्चितसाध्यवत्पक्षेधूमस्यवृत्तेः॥स्वतएवंतद्

भयपरं पक्षव्यतिरिक्तं तदुभयपरमपि। नचसाध्यवन्मात्रवृत्तित्वेनानिश्चितत्वेन
त्वेहेत्वाभासत्वेनचिरंषणान्नज्ञायमानेधूमेव्यतिरेकव्याप्तिमत्तयाज्ञायमानेवातत्रवृत्तिव्याप्तिरितिवाच्यं॥व्यतिरेकव्याप्तिम्तय
ज्ञायमाणेह्यंतरेणासत्प्रतिपक्षितधूमेनथाप्यनित्यः॥जलह्रदादिपक्षस्वरूपासिद्धतयाहेत्वाभासत्वज्ञायमानेधूमेतिग
मेऽपि॥अथासाधारण्याभावकालावच्छिन्नसाध्याप्यत्वाभावस्यसत्तितत्कालावच्छिन्नविरुद्धाव्यभावत्वमुक्तलक्ष
णार्थंविशेषितं॥साध्यव्यापकविरुद्धेचासाधारण्यंतदभावकालावच्छिन्नत्वविरहान्नाव्याप्तिरितिचेन्नाऽअ
साधारण्येहिनसुषीयंनस्त्रीयंवायत्किंचिस्सुषीयंयत्किंचिस्त्रीयंवाव्यवच्छिद्यते॥साध्यसाध्यविशेषणमात्मस्वरू
वस्यासाधारण्यंकथंनावैतीति॥तत्साध्यकसाधारणंप्रमेयत्वादेरभावेवज्रलेपवत्॥नचैतत्सुखंप्रतिसाधारण
त्वाभावेपिपुरुषांतरंप्रतिस्यादितिवाच्यं॥तत्रनिश्चयदशायांतत्साधकसाधारण्यकस्यापिनावतीर्णेतत्साध्यसाधारण
तथाप्यभ्यासः॥अंशेयत्तिविसुषीयंयत्तिचित्साध्यकसाधारण्यदशायांतद्देशसाधार ण्यमात्रेणविरुद्धाभावत्व
नसंभेत्स्यतादशायांज्ञातुंशक्यादावितिस्यात्॥अत्राचक्ष्महे॥साध्यवन्मात्रवृत्तित्वंसाध्याभावकमात्रवृत्तित्वंसाभयनिश्चिय
विरोधिसहाभ्यस्तोपाधिमत्त्वमत्रविवक्षितंतदाद्यापाधिसपक्षविपक्षगामित्वमनुपसंहार्यत्वमसाधारणांशेऽयंहेत्वसा
धारण्यसप्रतिपक्षोभाषकृतेत्यादिग्रंथेनाप्युक्तत्वपक्षेणापिनिश्चयविरोधित्वेनाप्तितथापिसाध्यवन्मात्रवृत्तित्वनिश्चयविरोधि

द्रष्टव्यं॥ इतिपक्षाभासः॥ नचैवंविरुद्धस्याप्यत्रैवान्तर्भावेविभागव्याघातः॥ युधेयसंकरेऽपि युधेरसंकरात्॥ अन्यथाभावेऽपि
भावेतस्यैतेनोक्तदोषापत्तिः॥ केचित्तुसाध्याप्तेनाप्रतीयमाणेऽसतिबाधासिध्यतिरिति हेत्वाभासताप्रयोज
कंधर्मिणीति चेत्तदयसाधारणंलक्षणंब्रूमः॥ असाधारणंचनसत्त्वंतिपक्षांतर्भूतत्वादूषणं॥ तदेतद्विरुद्धव्यभिचारा
त्॥ दूषकताबीजस्यैकत्वात्॥ तथाचसंग्रहेतावसाधारणोनाम्नाप्तिरितिवदंतितेनेति॥ तेनासाधा रणस्यसाध्यतद्भा
वनिरूपितव्याप्तिरूपग्रहमग्रहपुरस्कारेणासाध्यतद्भावाभावकृतयादूषणाद्यपक्षेनाव्याप्तिरित्यर्थः॥ प्रथमलक्ष
णेतुतस्मिन्नव्याप्तिरेवतत्संज्ञायविरोधिभिरव्याप्तिग्रहविरहस्याविशिष्टस्यैवसपक्षविपक्षे व्यावृत्तस्यभयकृ
द्युपस्थापकतावच्छेदकत्वेनसंग्रहादितिभावइतिकेचित्॥ नचैवमिति॥ यद्यविबाधस्यसाध्या भावरूपत्वेनतदु
त्थापकत्वंतर्हिप्रमितसाध्याभाववत्पक्षकत्वस्यबाधस्यगंधवद्भूमितत्तत्स्थलिंगत माहसाध्याभावस्
यकत्वमित्यर्थः॥ इदंचोपलक्षणं॥ विरुद्धस्यापिसाध्याभावज्ञापकत्वेनतदंतर्भावापत्तिरितिद्रष्टव्यं॥ ननुतयोस्सं
ग्राह्यसान्तदोषइत्यनुज्ञामेनाहसमेतीति॥ अतएवेति॥ अन्योन्याभावस्याप्यव्याप्यवृ त्तेत्यादुक्तातिव्याप्त
रेवेत्यर्थः॥ यद्वाअनुपसंहारीतिमात्रंवेत्यर्थः॥ अतएवाग्रेतद्व्यावृत्तेलक्षणमाहुरपीति निश्चितसाध्यवद्वृत्ति
हेसतिसाध्यवदन्यवृत्तित्वमित्यर्थः॥ ननुनिश्चितसाध्यवदन्यवृत्तित्वेतादृक्षवृत्तित्वेनधूमादावतिव्याप्तिरप्रसि

ऐतिजनयेवेतिज्ञमुकेसाध्यवदन्यस्मिन्नुभयहेत्वोरित्येवोद्व्यतरव्यर्थः॥नायीति॥पूर्वविपक्षव्यमन्योन्याभावग
र्भमित्रत्वसंतानावगमभमुक्तमितिनयोनरुक्त्येसपक्षसदेवान्वयनिश्चयाघटितमतोनयोनरुक्त्ये॥नचपैक्ष्यर्थविशेष
णतो पक्षान्ययदन्यर्थतानेत्यर्थःविरुध्यतेति॥साध्यानवगतसहचरितत्वसतीत्यादिरूपसंग्रहार्थः॥सर्वेतियत्किं
चित्साध्यवदन्यवृत्तित्वेधूमादावपीस्तउक्तंसर्वेति॥साध्यवद्विशेषणं॥नतुसाध्यविशेषणं तद्वतापसिद्धेःसामा
न्याभावाविवक्षायामिदंतद्विवक्षायांतुव्यर्थविशेषणमवेतिदुर्घटत्वं॥येकव्यक्तिवेति। येकव्यक्तिराश्रयस्त
यास्यसाध्यस्यतदेकमक्तिकंसाध्यकं॥तथाचानेकत्वाचिसर्वपदाभीसेभवस्तत्रेतिभा वः॥विपक्षवृत्तित्व
